~~Hindi~~ MS. | Sans

394.592
G289

1205-MS.

गया माहात्म्य मुद्रित; संस्कृत भाषा मुद्रित ॥ काशी संस्कृत प्रैस बाबू वाराणसी प्रसाद द्वारा १९४१कि० मुद्रित

२० पत्रक ॥ १३ पं० प्र० पृ०

संस्कृत ह० ल०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1205-MS.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथगयामाहात्म्यप्रारंभः

1205-MS

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग·मा· श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ सूतउवाच॥ शौनकाद्यैर्महाभागैर्ऋषिभिःसहनारदः॥ सनत्कुमारंपप्रच्छप्र
१ णम्यविधिपूर्वकं॥१॥ नारदउवाच॥ सनत्कुमारमेब्रूहितीर्थंतीर्थोत्तमोत्तमं॥ तारकंसर्वभूतानांपठतांशृण्वतां
तथा॥२॥ सनत्कुमारउवाच॥ वक्ष्येतीर्थंपरंपुण्यंश्राद्धादौसर्वतारकं॥ गयातीर्थंसर्वदेशेतीर्थेभ्योप्यधिकंशृणु॥
३॥ गयासुरस्तपस्तेपेब्रह्मणाक्रतवेर्थितः॥ प्राप्तस्यतस्यशिरसिशिलांधर्मोह्यधारयत्॥४॥ तत्रब्रह्माकरोद्यागंस्थि
तस्त्वादिगदाधरः॥ फल्गुतीर्थादिरूपेणनिश्चलार्थमहर्निशं॥५॥ गयासुरस्यविमलेब्रह्माद्यैर्दैवतैःसह॥ कृतयज्ञोद
दौब्रह्माब्राह्मणेभ्योगृहादिकं॥६॥ श्वेतकल्पेतुवाराहेगयोयागमकारयत्॥ गयानाम्नागयाख्यातंक्षेत्रंब्रह्मर्षिकांक्षितं
॥७॥ कांक्षंतिपितरःपुत्रान्नरकाद्भयभीरवः॥ गयांयास्यतियःपुत्रःसनस्त्राताभविष्यति॥८॥ गयाप्राप्तंसुतंदृष्ट्वापि
तॄणामुत्सवोभवेत्॥ पद्भ्यामपिजलंस्पृष्ट्वासोस्मभ्यंकिन्नदास्यति॥९॥ एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत्॥ यजे
तावाश्वमेधेननीलंवावृषमुत्सृजेत्॥१०॥ गयांगत्वान्नदातायःपितरस्तेनपुत्रिणः॥ पक्षत्रयनिवासीचपुनात्यास
प्तमंकुलं॥ नोचेत्पंचदशाहंवासप्तरात्रंत्रिरात्रकं॥ महाकल्पकृतंपापंगयांप्राप्यविनश्यति॥१२॥ पिंडंदद्याच्चपि
त्रादेस्तथात्मनोपितिलैर्विना॥ ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः॥१३॥ पापंतत्संगजंसर्वंगयाश्राद्धाद्विनश्यति॥ आ
त्मजोवान्यजोवापिगया भूमौयदातदा॥१४॥ यन्नाम्नापातयेत्पिंडंतन्नयेद्ब्रह्मशाश्वतं॥ ब्रह्मज्ञानंगयाश्राद्धंगोगृ रामः
हेमरणंतथा १५ वासःपुंसांकुरुक्षेत्रेमुक्तिरेषाचतुर्विधा॥ ब्रह्मज्ञानेनकिंसाध्यंगोगृहेमरणेनकिं॥१६॥ वासे १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत्॥ गयायां सर्वकालेषु पिंडं दद्याद्विचक्षणः॥१७॥ अधिमासे जन्मदिने चास्तेपि
गुरुशुक्रयोः [illegible] गयाश्राद्धं सिंहस्थे च बृहस्पतौ॥१८॥ सकृद्गयाभिगमनं सकृत्पिंडप्रपातनं॥ दुर्लभं किं
पुनर्नित्यं [illegible] व्यवस्थितः॥१९॥ प्रमादान्म्रियते क्षेत्रे ब्रह्मादेर्मुक्तिदायके॥ ब्रह्मज्ञानाद्गयाश्राद्धमुक्तिर्लभ्यते नात्र
संशयः [illegible] कीकटादिमृतानां च पितॄणां तारणाय च॥ तस्मात्सर्वप्रयत्नेन वक्तव्यं सुविचक्षणैः॥२१॥ ब्रह्मप्रकल्पि
[illegible] व्यकव्यादिनार्चयेत्॥ तैस्तुष्टैस्तोषिताः सर्वाः पितृभिः सह देवताः॥२२॥ मुंडनं चोपवासश्च सर्वतीर्थे
[illegible] वाथेः॥ वर्जयित्वा कुरुक्षेत्रं विशालं विरजां गयां॥२३॥ दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः॥ दंडं स्त्वा विष्णुपदे
पितृभिः सह मुच्यते॥२४॥ नदंडी किल्बिषं धत्ते पुण्यं वा पारमार्थदं॥ अतः सर्वक्रियां त्यक्त्वा विष्णुं ध्यायेत्तु भावुकं॥२५
॥ संन्यसेत्सर्वकर्माणि वेदमेकं न संत्यजेत्॥ मुंडपृष्ठाच्च पूर्वस्मिन्पश्चिमे दक्षिणोत्तरे॥२६॥ सार्द्धक्रोशद्वयं मानं गयेति ब्र
ह्मणेरितं॥ पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥२७॥ तन्मध्ये सर्वतीर्थानि त्रैलोक्ये यानि संति वै॥ श्राद्धकृद्यो गया
क्षेत्रे पितॄणामनृणो हि सः॥२८॥ शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत्॥ गृहाच्चलितमात्रेण गयायां गमनं प्रति॥
२९॥ स्वर्गारोहणसोपानं पितॄणां च पदे पदे॥ पदे पदेऽश्वमेधस्य यत्फलं गच्छतो गयां॥२९॥ तत्फलं च भवेन्नॄणां समग्रं
नात्र संशयः॥ पायसेनाथ चरुणा सक्तुना पिष्टकेन वा॥ ३०॥ तंडुलैः फलमूलाद्यैर्गयायां पिंडपातनं॥ तिलकल्केन खं
डेन गुडेन सघृतेन वा॥ ३१॥ केवलेनैव दध्ना वा ऊर्षेन मधुनापि वा॥ पिण्याकं सघृतं खंडं पितृभ्योक्षय्यमित्युत॥३२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इष्यते पितृभिर्भोज्यं हविष्यान्नं मुनीरितं॥ मुष्टिमात्रप्रमाणेन चार्द्रामलकमात्रकं॥ ३३॥ शमीपत्रप्रमाणेन पिंडं दद्या
द्गयाशिरे॥ उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतं॥ ३४॥ पिता माता च भार्या च भगिनी दुहितुः पतिः॥ पितृष्वसा मातृ
ष्वसा सप्तगोत्रांश्च तारयेत्॥ ३५॥ चतुर्विंशश्च विंशश्च षोडशद्वादशैव हि॥ रुद्रादशावसुश्चैव कुलमेकोत्तरं शतं॥ ३६॥
एकतः सर्वतीर्थानि (?) सर्वं तिमधूनि हि॥ स्थलागदाधरांघ्रिब्जं फल्गुतीर्थांबु चैकतः॥ ३७॥ नावाहनं न दिग्बंधो न दोषो
दृष्टिसंभवः॥ सकारुण्येन कर्त्तव्यं तीर्थश्राद्धं विचक्षणैः॥ ३८॥ पिंडासनं पिंडदानं पुनः प्रत्यवनेजनं॥ दक्षिणा चान्नसं
कल्पो तीर्थश्राद्धेष्वयं विधिः॥ ३९॥ अन्यत्रावाहिताः काले पितरो यांत्यमुं प्रति॥ अत्रागतं सुतं दृष्ट्वा स्वयमायांति सर्व
या॥ ४०॥ तीर्थश्राद्धं प्रयच्छद्भिः पुरुषैः फलकांक्षिभिः॥ कामं क्रोधं तथा लोभं त्यक्त्वा कार्याऽदिकाः क्रियाः॥ ४१॥ ब्रह्मचा
र्येकभोजी च भूशायी सत्यवाक् शुचिः॥ सर्वभूतहिते रक्तः स तीर्थफलमश्नुते॥ ४२॥ तीर्थान्यनुसरन्धीरः पाखंडं पूर्व
[illegible] पाखंडं तच्च विज्ञेयं यद्भवेत्कर्म कामतः॥ तीर्थेषु ये नरा धीराः कर्म कुर्वंति तद्गताः॥ ४३॥ यथा ब्रह्मविदो वेदं
[illegible] ते सदः॥ प्रविशंति परं सांख्यं ब्रह्म ब्रह्मपरायणाः॥ ४४॥ गयायां नहि तत्स्थानं यत्र तीर्थं न विद्यते॥ सान्नि
ध्यं सर्वतीर्थानां गया तीर्थं ततो वरं॥ ४५॥ मीने मेषे स्थिते सूर्ये कन्यायां कार्मुके घटे॥ दुर्लभं त्रिषु लोकेषु गयायां पिंडपात
नं॥ ४६॥ कृतास्तरे वर्त्तमाने च ग्रहणे चंद्रसूर्ययोः॥ दुर्लभं त्रिषु लोकेषु गयायां पिंडपातनं॥ ४७॥ गयायां पिंडदानेन यत्फ
लं लभते नरः॥ न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि॥ ४८॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये प्रथ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मोध्यायः॥१॥ नारद उवाच॥ गयासुरः कथं जातः प्रभावः किंकिमात्मकः॥ तपस्तप्तं कथं तेन कथं देहपवित्रता॥१॥
सनत्कुमार उवाच॥ विष्णोर्नाभ्यंबुजाज्जातो ब्रह्मा लोकपितामहः॥ प्रजाः ससर्ज संप्रोक्तः पूर्वं देवेन विष्णुना॥२॥ आ
सुरेण स्वभावेन ह्यसुरानसृजत्पुरा॥ सौमनस्येन भावेन देवान्सुमनसोऽसृजत्॥३॥ गयासुरः सुराणां च महाबलपरा
क्रमः॥ योजनानां सपादं च शतं तस्योच्छ्रयं स्मृतः॥४॥ स्थूलः षष्टियोजनानां श्रेष्ठोसौ वैष्णवैः स्मृतः॥ कोलाहले गिरि
वरे तपस्तेपे सुदारुणं॥५॥ बहुवर्षसहस्राणि निरुच्छ्वासः स्थिरोभवत्॥ तत्तपस्तापिता देवाः संक्षोभं परमं गताः॥६
॥ ब्रह्मलोकं गता देवाः प्रोचुस्तत्र पितामहं॥ गयासुराद्रक्ष देव ब्रह्मा देवांस्तथाब्रवीत्॥७॥ व्रजामः शंकरं देवाः ब्रह्मा
द्याश्च गताः शिवं॥ कैलासे चब्रुवन्नत्वा रक्षस्व महासुरात्॥ ब्रह्माद्यांश्चाब्रवीच्छंभुर्व्रजामः शरणं हरिं॥ क्षीराब्धौ देव
देवेशः स नः श्रेयो विधास्यति॥९॥ ब्रह्मा महेश्वरो देवाः विष्णुं नत्वा प्रतुष्टुवुः॥ देवा ऊचुः॥ ॐ नमो विष्णवे भूभर्त्रे सर्वेषां
प्रभविष्णवे॥१०॥ रोचिष्णवे जिष्णवे च राक्षसादिग्रसिष्णवे॥ धरिष्णवेखिलस्यास्य योगीनां पारहष्णवे॥११॥ बर्हिष्म
ते ह्यनंताय नमो भ्राजिष्णवे नमः॥ सनत्कुमार उवाच॥ एवं स्तुतो वासुदेवः सुराणां दर्शनं ददौ॥१२॥ किमर्थमागता दे
वा विष्णुनोक्तास्तमब्रुवन्॥ गयासुरभयाद्देव रक्षास्मान्नब्रवीद्धरिः॥१३॥ ब्रह्माद्या यां तु तं दैत्यं चागमिष्याम्यहं ततः॥ के
शवो गरुडारूढो वरं दातुं गयासुरं॥१४॥ सर्वे स्वं स्वं समास्थाय निजवाहनमुत्तमं॥ ऊचुस्तं वासुदेवाद्याः किमर्थं तप्यते
त्वया॥१५॥ संतुष्टास्त्वागताः सर्वे वरं ब्रूहि गयासुर॥ गयासुर उवाच॥ यदि तुष्टास्त्वमे देवाः ब्रह्मविष्णुमहेश्वराः॥१६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ सर्वदेवद्विजातिभ्योयज्ञतीर्थशिलोच्चयात्॥ देवेभ्योतिपवित्रोहंऋषिभ्योपिशिवाव्ययात्॥१७॥ ज्ञानिभ्यश्चापिक
३ र्मिभ्यः धर्मिभ्यश्चतथापुनः॥ मंत्रिभ्योतिपवित्रोहंपवित्रोभवभोसदा॥१८॥ पवित्रमस्तुतंदेवाः दैत्यमुक्त्वाययुर्दिवं
॥दृष्ट्वादैत्यंततःस्पृष्ट्वासर्वेहरिपुरंययुः॥१९॥ शून्येलोकत्रयेजातेशून्यायमपुरीह्यभूत्॥ यमइंद्रादिभिःसार्द्धंब्रह्म
लोकंततोगमत्॥२०॥ ब्रह्माणमूचिरेदेवागयासुरविलोपिताः॥ त्वयादत्तोधिकारोवैतंगृह्णपितामह॥२१॥ ब्रह्माब्र
वीत्ततोदेवान्व्रजामोविष्णुमव्ययं॥ ब्रह्मादयोब्रुवन्विष्णुंत्वयादत्तवरोसुरः॥२२॥ तद्दर्शनाद्ययुःस्वर्गंशून्यंलोकत्रयं
ह्यभूत्॥ देवैरुक्तोवासुदेवोब्रह्माणंसवचोब्रवीत्॥२३॥ गत्वासुरंप्रार्थयस्वयज्ञार्थंदेहिदेहकं॥ विष्णूक्तःससुरोब्रह्मा
गत्वापश्यन्महासुरं॥२४॥ गयासुरोब्रवीद्दृष्ट्वाब्रह्माणंत्रिदशैःसह॥ संपूज्योत्थायविधिवत्प्रणतःप्रश्रयान्वितः॥२५॥
गयासुरउवाच॥ अद्यमेसफलंजन्म अद्यमेसफलंतपः॥ यदागतोतिथिर्ब्रह्मासर्वंप्राप्तंममाद्यवै॥२६॥ योगिन्योगां
गवित्सर्वलोकस्वामिन्पितर्गुरो॥ यदर्थमागतोब्रह्मन्तत्कार्यंकरवाण्यहं॥२७॥ ब्रह्मोवाच॥ पृथिव्यांयानितीर्थानिदृ
ष्टानिभ्रमतामया॥ यज्ञार्थंनतुतेतानिपवित्राणिशरीरतः॥२८॥ त्वयादेहपवित्रत्वंप्राप्तंविष्णुप्रसादतः॥ अतःपवि
त्रंदेहंस्वंयज्ञार्थंदेहिमेसुर॥२९॥ गयासुरउवाच॥ धन्योहंदेवदेवेशयद्देहःप्रार्थ्यतेत्वया॥ पितृवंशःकृतार्थोहंमातृ
वंशस्तथैवच॥३०॥ त्वयैवोत्पादितोदेहःपवित्रस्तुत्वयाकृतः॥ सर्वेषामुपकारायत्यागोवश्यंभविष्यति॥३१॥ इत्यु रामः
क्त्वासोपतद्भूमौश्वेतकल्पेगयासुरः॥ नैर्ऋतींदिशमाश्रित्यतदाकोलाहलेगिरौ॥३२॥ शिरःकृत्वोत्तरेदैत्यःपादौ ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृत्वा तु दक्षिणे॥ ब्रह्मा संभृतसंभारान्मानसानृत्विजोऽसृजत्॥३३॥ अग्निशर्माणमस्त्रं शौनकं प्रांजलिं स्थितं॥
कुमर्यं वेदकौंडिन्यं हारितं काश्यपं कृपं॥३४॥ गार्ग्यं कौशिकवासिष्ठं मुनिं भार्गवमव्ययं॥ वृद्धं पाराशरं काण्वं मांडु
व्यं श्रुतिकेवलं॥३५॥ श्वेतं सुतालं दमनं कुहोत्रं कर्कमेव च॥ लौगाक्षिं च महाबाहुं जैगीषव्यं तथैव च॥३६॥ दधिपं
चभुवं विप्रमृषभं कर्कमेव च॥ कात्यायनं गोभिलं च मुनिमिश्रं महाव्रतं॥३७॥ सुपालकं गौतमं च तथा वेदशिरोव्रतं॥
जटामालिनमव्यग्रं चाट्टहासं च दारुणं॥३८॥ आत्रेयं चाप्यांगिरसमोपमन्युं महाव्रतं॥ गोकर्णं च गुहावासं शिखंडि
नमुमाव्रतं॥३९॥ एतानन्यांश्च विप्रेंद्रान्देवलोकपितामहः॥ परिकल्प्याकरोद्यागं गयासुरशरीरके॥४०॥ अग्निशर्मा
पि पंचाग्नीन्सुखादेतानथासृजत्॥ दक्षिणाग्निं गार्हपत्यं आहवनीयं तपोमयः॥४१॥ सभ्यावसथ्यौ देवर्षे ये सुयज्ञाः
प्रकीर्तिताः॥ यज्ञस्य च प्रतिष्ठार्थं विप्रेभ्यो दक्षिणां ददौ॥४२॥ हुत्वा पूर्णाहुतिं ब्रह्मा स्नात्वा चावभृथोसुरः॥ यज्ञवाटे सु
रैः सार्द्धं समानीय व्यरोपयत्॥४३॥ ब्रह्मणः सरसि श्रेष्ठो तदा दैत्यो महासुरः॥ चलितश्चकितो ब्रह्मा धर्मराजमभाषत
॥४४॥ जातारहे त्वशिलतामानीयात्र धारय॥ दैत्यस्य शीघ्रं शिरसि तां धारय ममाज्ञया॥४५॥ निश्चलार्थं यमः श्रु
त्वा धारयन्मस्तके शिलां॥ शिलायां धारितायां तु सशिलश्चासुरोऽचलत्॥४६॥ देवाः पादैर्लसयित्वा तथापि चलितो
सुरः॥ ब्रह्मा च व्याकुलो विष्णुं गतः क्षीराब्धिशायिनं॥४७॥ तुष्टाव प्रणतो भूत्वा नत्वा चाहाद तः प्रभुं॥ ब्रह्मोवाच॥ ब्र
ह्मांडस्य पते नाथ नमामि जगतां पतिं॥४८॥ पतिं कीर्तिमतां नृणां भुक्तिमुक्तिप्रदायकं॥ विष्वक्सेनो ब्रवीद्धि सुंदे

ग॰मा॰ वत्वांस्तौति पद्मजः॥५०॥ हरिराह्वानयस्त्वं विसृक्तः सतमानयत्॥ अजमूचे हरिः कस्मादागतोसि वदस्व तत्॥
४ ५१॥ ब्रह्मोवाच॥ देवदेव कृते यागे प्रचचाल गयासुरः॥ शिलायां देवरूपिण्यां न्यस्तायां तस्य मस्तके॥५२॥ रुद्रादि
षु च देवेषु संस्थितेष्वसुरोचलत्॥ इदानीं निश्चलार्थं हि प्रसादं कुरु माधव॥५३॥ ब्रह्मणो वचनं श्रुत्वा ह्याकृष्य।
स्व शरीरतः॥ मूर्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान्हरिः॥५४॥ आनीय मूर्तिं ब्रह्मापि शिलायां समधारयत्॥ तथापि च
लितं वीक्ष्य पुनर्देवं समाह्वयत्॥ आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितो भवत्॥५५॥ जनार्द्दनाभिधानेन पुंडरीका
क्षनामतः॥ शिलायां निश्चलार्थं हि स्वयमादिगदाधरः॥५६॥ निश्चलार्थं पंचधासीत् शिलायां प्रपितामहः॥ पितामहो
थ फल्गवीशः केदारः कनकेश्वरः॥५७॥ ब्रह्मा स्थितः स्वयं तत्र गजरूपी विनायकः॥ गयादित्यश्चोत्तरार्को दक्षिणार्क
स्त्रिधा रविः॥५८॥ लक्ष्मी सीताभिधानेन स्थिता वै मंगलाह्वया॥ गायत्री चैव सावित्री त्रिसंध्येयं सरस्वती॥५९॥ इंद्रो बृ
हस्पतिः पूषा वसवोष्टौ मुनीश्वराः॥ विश्वेदेवा अश्विनौ च मरुतो विश्वनायकः॥६०॥ सयक्षोरगगंधर्वास्तस्थुर्देवाः स्व
शक्तितः॥ आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः॥६१॥ स्थित इत्येव हरिणा तस्मादादिगदाधरः॥ ऊचे गयासुरो
देवान्किमर्थं वंचितो ह्यहं॥६२॥ यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया॥ विष्णोर्वचनमात्रेण किं न स्यां निश्चलो ह्यहं॥६
॥ यत्सुरैः पीडितोत्यर्थं गदया हरिणा तथा॥ पीड्यश्च यद्यहं देवाः प्रसन्नाः संतु सर्वदा॥६४॥ गदाधरादयस्तुष्टाः प्रो। रामः
चुश्चापि गयासुरं॥ वरं ब्रूहि प्रसन्नाःस्मो देवानूचे गयासुरः॥६५॥ गयासुर उवाच॥ यावत्पृथ्वी पर्वताश्च यावच्चंद्रार्कता ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रकाः॥ तावच्छिलायांतिष्ठंतुब्रह्मविष्णुमहेश्वराः॥६६॥ अन्येचसकलादेवाः मन्वाद्यास्तेत्रमस्तकैः॥ पंचक्रोशंगयाक्षे-
त्रंक्रोशमेकंगयाशिरः॥६७॥ तन्मध्येसर्वतीर्थानित्रैलोक्येयानितानिवै॥ गंगाद्याःसुमहानद्योसरांसिविविधानिच॥६८
॥तेदेवास्तानितीर्थानिप्रयच्छंतुहितंनृणां॥ स्नानादितर्पणंकृत्वापिंडदानात्फलादिकं॥६९॥ एकोविष्णुस्त्रिधामूर्तिर्याव
त्संकीर्त्यतेबुधैः॥ तावद्गयाशिरःक्षेत्रंख्यातिमेतुसदाभुवि॥७०॥ महात्मानंसहस्रंचकुलानांचोद्धरेत्तुसः॥ व्यक्ताव्यक्तस्वरू
पेणयूयंतिष्ठंतुसर्वदा॥७१॥ गदाधरःस्वयंलोकान्पूजनादघनाशनः॥ श्राद्धंसपिंडकंयेषांब्रह्मलोकंप्रयांतुते॥७२॥
ब्रह्महत्यादिकंपापंविनश्यतिचसेविनां॥ नैमिषंपुष्करंगंगांप्रयागंचविमुक्तिदं॥७३॥ एतान्यन्यानितीर्थानिदिविभुव्यं
तरिक्षतः॥ समायांतुसदानृणांप्रयच्छंतुहितंनृणां॥७४॥ किंबहूक्त्यासुरेशानायुष्मास्वेकापिदेवता॥ चेन्नतिष्ठेदहंचा
पिसमयःप्रतिपाल्यतां॥७५॥ गयासुरवचःश्रुत्वाप्रोचुर्विष्ण्वादयःसुराः॥ त्वयायत्प्रार्थितंसर्वंतद्भविष्यत्यसंशयं॥
७६॥ पितृणांवैकुलशतमात्मानंपिंडदानतः॥ श्राद्धादिनानयिष्यंतिब्रह्मलोकमनामयं॥७७॥ अस्मत्पदान्यर्चयित्वाया
स्यंतिपरमांगतिं॥ देवैर्दत्तवरोदैत्योहर्षितोनिश्चलोभवत्॥७८॥ स्थितेषुचैवदेवेषुब्राह्मणेभ्योददौह्यजः॥ ग्रामास्तुपं
चपंचाशत्पंचक्रोशंगयांतथा॥७९॥ गृहान्कृत्वाददौदिव्यान्सर्वोपस्करसंयुतान्॥ कामधेनुंकल्पवृक्षंपारिजाता-
दिकांस्तरून्॥८०॥ महानदींक्षीरवाहांघृतकुल्यांतथैवच॥ मधुस्रवांमधुकुल्यांदध्याज्यादिसरांसिच॥८१॥ सुवर्णदी
र्घिकांचैवबहूनन्नादिपर्वतान्॥ भक्ष्यभोज्यफलादींश्चसर्वंब्रह्माऽसृजन्ददौ॥८२॥ नयाचध्वंचविप्रेंद्रा अन्यान्तुल्काद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ दौह्यजः॥ दत्वा ययौ ब्रह्मलोकं नत्वाद्यादिगदाधरं॥ ८३॥ धर्मारण्ये तत्र धर्मयाजयित्वा ययाचिरे॥ धर्मयागे चलोभा
५ द्वै प्रतिगृह्य धनादिकं॥ ८४॥ तांबूलेपं चरत्नानि बलेनै वद्दौ नृपः॥ धर्मयागस्य वै धूमे स्वर्गलोकं गते सति॥ ८५॥ ततो ब्र
ह्मा समागत्य ब्राह्मणांस्तान् शशाप ह॥ कृतवंतो यतो लोभं मद्दते षखिलेष्वपि॥ ८६॥ तस्मात्तस्माधिका यूयं भविष्यथ
सदा द्विजाः॥ युष्माकं वारिवाहाः स्यान्नदी पाषाण पर्वताः॥ ८७॥ नद्यादयो वारिवाहा मद्दाद्याः प्रचुरा गृहाः॥ कामधेनुः
कल्पवृक्षोऽस्त्वलोकमुपतिष्ठतु॥ ८८॥ एवं शप्ता ब्राह्मणा ते प्रार्थयंतो ब्रुवन्नजं॥ त्वयायद्दत मखिलं तत्सर्वं शापतो गतं
॥ ८९॥ जीवनार्थं प्रसादं नो भगवन् कर्तुमर्हसि॥ तच्छ्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः॥ ९०॥ तीर्थोपजीविका यू
यमाचंद्रार्कं भविष्यथ॥ लोकाः पुण्या गयायां ये श्राद्धिनो ब्रह्मलोकगाः॥ ९१॥ युष्मान्ये पूजयिष्यंति तैरहं पूजितः सदा॥
आक्रांतं दैत्यजठरं धर्मेण विरजाद्रिणा॥ ९२॥ नाभिकूपसमीपे च देवी च विरजास्थिता॥ तत्र पिंडादिकं कृत्वा त्रिःसप्तकुल
मुद्धरेत्॥ ९३॥ माहेंद्र गिरिणा तस्य कृतौ पादौ सुनिश्चलौ॥ तत्रापि पिंडकृत्सप्तकुलान्युद्धरते नरः॥ ९४॥ इति वा॰ श्वेतवाराह
कल्पे गयामाहात्म्ये द्वितीयोऽध्यायः॥ २॥ नारद उवाच॥ कथं शिला समुत्पन्ना यया क्रांतो गयासुरः॥ किं रूपं किं च माहात्म्यं
तस्याः किं वद नाम च॥ १॥ सनत्कुमार उवाच॥ शृणु नारद यत्पुण्यं कथयामि पुनस्तव॥ आसीद्धर्मो महातेजाः सर्वविद्या
नपारगः॥ विश्वरूपा च तत्पत्नी भर्तृव्रतपरायणा॥ २॥ तस्या धर्मात्समुत्पन्ना कन्या धर्मव्रता सती॥ सर्वलक्षणसंपन्ना ल रामः
क्ष्मीरिव गुणाधिका॥ ३॥ तस्यां ये तु गुणाढ्याः संस्ते न संति जगत्त्रये॥ धर्मो धर्मव्रतायां तु त्रिषु लोकेषु मार्गयन्॥ ४॥ नानुरू ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंवरं लेभे धर्मोक्तवरसिद्धये॥ तपः कुरु वरार्थं त्वं तथेत्युक्त्वा वनं ययौ॥५॥ कन्या सा च तपस्तेपे सर्वैर्धां दुस्तरं च यत्॥
वायुभक्षाश्वेतकल्पे युगानामयुतं पुरा॥६॥ ब्रह्मणो मानसः पुत्रो मरीचिर्नाम विश्रुतः॥ प्रवृत्तिलक्षणं धर्मं कर्तुं सब्रह्मणे
रितः॥ पर्यटन् पृथिवीं सर्वां कन्यारत्नं ददर्श सः॥७॥ रूपयौवनसंपन्नां परमे तपसि स्थितां॥ पप्रच्छाथ मरीचिस्तां कात्वं
कस्यासि तद्वद॥८॥ रूपेणानेन मां नूनं विमोहयसि सुव्रते॥ ब्रह्मात्मजोहं विख्यातो मरीचिर्वेदपारगः॥९॥ मरीचेर्वचनं
श्रुत्वा कन्या प्रोवाच तं मुनिं॥ अहं धर्मव्रता नाम धर्मपुत्री तपोन्विता॥१०॥ पतिव्रतार्थं विप्रेंद्र चरामि परमं तपः॥ कामा
वाप्तिर्भवेद्यावत्तावदेतत्प्रवर्तनम्॥ धर्मव्रतां मरीचिस्तामुवाच प्रीतिपूर्वकं॥११॥ पतिव्रता दर्शनान्मे भविष्यसि शुभव्र
ते॥ पतिव्रतेच्छया पृथ्वीं विचरामि ह्यहर्निशं॥१२॥ त्वं चेत्पतिव्रता जाता भजं तं भज मां वरं॥ लोके न त्वादृशी कन्या समतु
ल्यो न ते वरः॥१३॥ धर्मव्रते धर्मपुत्री तस्मात्त्वं भज मेधुना॥ धर्मव्रता मुनिं प्राह धर्मं याचय सुव्रत॥१४॥ तच्छ्रुत्वा धर्मम
गमन्मुनिं धर्मो ददर्श ह॥ तेजःपुंजवरं नत्वा आसनार्घ्यादिनार्चयत्॥१५॥ किमर्थमागतः पृष्टो मरीचिर्धर्ममब्रवीत्॥ कं
न्यार्थं भ्रमता पृथ्वीं दृष्टा ते कन्यका वरा॥१६॥ मह्यं कन्यां च तां देहि श्रेयस्तव भविष्यति॥ अर्घ्यादिनासमभ्यर्च्य धर्मः प्रो
वेत यथेति तं॥१७॥ धर्मव्रतां समानीय दत्तवांस्तां मरीचये॥ वरं च दत्तवांस्तस्मै तद्वाक्यं च यथाकृतं॥१८॥ अग्निहोत्रेण
सहितं स्वाश्रमं तां द्विजो नयत्॥ रेमे मुनिस्तया सार्द्धं यथा विष्णुः श्रिया सह॥१९॥ पार्वत्या च यथा शंभुः सावित्र्या च यथा
ह्यजः॥ जज्ञे पुत्रशतं तस्यां मरीचिर्विष्णुगोपमं॥२०॥ मारीचिः फलपुष्पार्थं वनं गत्वा समागतः॥ श्रांतः कदाचित्तां प॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ स्त्रीमुवाचेति पतिव्रतां॥२१॥मुक्त्वा तु शयनस्थस्य पादसंवाहनं कुरु॥धर्मव्रता तथेत्युक्त्वा शयानस्य च सा मुनेः॥२२॥
६ पादसंवाहनं चक्रे घृतेनाभ्यज्य तत्परा॥निद्रायमाने च मुनौ ब्रह्मा तं देशमागतः॥२३॥इयेष दृष्ट्वा ब्रह्माणं मनसार्चि
यितुं प्रभुं॥पादसंवाहनं कुर्यां किं ब्रह्माणं प्रपूजयेत्॥२४॥इत्याकुला समुत्तस्थौ मत्वा सा च गुरोर्गुरुं॥अर्घ्यपाद्यादिकं
कृत्वा ब्रह्माणं समपूजयत्॥२५॥संस्कृतायां तु शय्यायां विश्राममकरोदजः॥एतस्मिन्नंतरे भर्ता समुत्तस्थौ स्वतल्प
तः॥२६॥धर्मव्रतामपश्यत्स विप्रः क्रुद्धः शशाप तां॥२८ पादसंवाहनं त्यक्त्वा यस्मादाज्ञां विहाय मे॥गतान्यत्र ततः
पापाच्छापदग्धा शिला भव॥२५॥भर्त्रा धर्मव्रता शप्ता मरीचिं प्राह कोपिता॥शयाने त्वयि संप्राप्तो ब्रह्मा त्वज्जनको गु
रुः॥२६॥त्वयोत्थाय हि कर्तव्यं स्वगुरोः पूजनं सदा॥मया तु धर्मचारिण्या तव कार्यं कृतं मुने॥२७॥अदोषाहं यतः
शप्ता तस्माच्छापं ददामि ते॥त्वं च शापं महादेवात् भर्तः प्राप्स्यस्यसंशयं॥२८॥व्याकुलं तं पतिं दृष्ट्वा व्याकुला सा प्रजा
पतिं॥नत्वा शयानं ब्रह्माणमग्निं प्रज्वाल्य चेंधनैः॥२९॥गार्हपत्येऽस्थिता चक्रे तपः परमदुष्करं॥तथा शप्तो मरीचि
श्च तपस्तेपे सुदारुणं॥३०॥पतिव्रतायास्तपसा मरीचेस्तपसा तथा॥इंद्रादयश्च संतप्ता गतास्ते शरणं हरिं॥३१॥ऊ
चुः क्षीरांबुधौ सुप्तं संतप्तास्तपसा हरे॥पतिव्रतायास्तपसा त्रैलोक्यं रक्ष केशव॥३२॥इंद्रादीनां वचः श्रुत्वा विष्णुर्धर्म
व्रतां ययौ॥एतस्मिन्नेव काले तु प्रबुद्धो भगवानजः॥३३॥ऊचुर्धर्मव्रतां देवा अग्निस्थां सहकेशवाः॥अग्निमध्ये तपः राम॰
कर्तुं केन शक्यं पतिव्रते॥३४॥त्वया कृतं यत्परमं सर्वलोकभयंकरं॥वरं वरय धर्मज्ञे अस्मत्तो यदभीप्सितं॥३५॥विष्णा ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवानां वचः श्रुत्वा देवान् धर्मव्रताब्रवीत्॥ भर्तुः शापम शक्ताहं निवर्तयितुमंजसा॥३६॥ दत्तो मरीचिना शापो मह्यं स
द्य पगच्छतु॥ धर्मव्रता वचः श्रुत्वा प्रोचुरेनां सुराः पुनः॥३७॥ धर्मव्रते धर्मपुत्रि शापोयं परमर्षिणा॥ दत्तस्तेन न निरा
कर्तुं शक्यो देवद्विजातिभिः॥३८॥ तस्मादन्यं वरं ब्रूहि यतो धर्मस्य संस्थितिः॥ भवे हि त्रिषु लोकेषु वेदोक्तस्य शुभव्रते॥
३९॥ देवानां वचनं श्रुत्वा देवान् धर्मव्रताब्रवीत्॥ भर्तुः शापान्मोचयितुं न शक्रुयद्विजामराः॥४०॥ मह्यं वरं प्रयच्छध्वं
एवंविधमनुत्तमं॥ शिलाहं हि भविष्यामि ब्रह्मांडपावनी वरा॥४१॥ नदीनदसरस्तीर्थदेवादिभ्योतिपावनी॥ ऋष्यादि
भ्यो मुनिभ्यश्च मुख्यदेवेभ्य एव च॥४२॥ तीर्थान्यपि च सर्वाणि मे स्युः शेत्रमुखास्तथा॥ तिष्ठंतु देवाः सकला देव्यश्च मुन
यस्तथा॥४३॥ मूर्तामूर्तस्वरूपेण पदरूपेण देवताः॥ व्यक्ताव्यक्तस्वरूपेण मयि तिष्ठंतु सर्वदा॥ मां दृष्ट्वा सर्वलोकाश्च मु
क्ताः पापोपपातकैः॥ भवेयुर्देवशार्दूलब्रह्मविष्णुमहेश्वराः॥४४॥ शिलास्थितेषु तीर्थेषु स्नानं कृत्वा च तर्पणं॥ श्राद्धं स
पिंडकं येषां विष्णुलोकं प्रयांतु ते॥४५॥ गदाधरोदृश्य तीर्थं सर्वतीर्थोत्तमोत्तमं॥ मुक्तिर्भवतु पितॄणां कर्तॄणां श्राद्धतः सदा
॥४६॥ जरायुजांडजा वापि स्वेदजा वापि चोद्भिजाः॥ त्यक्त्वा देहं शिलायां तु यांति विष्णुस्वरूपतां॥४७॥ यथार्चिते हरौ सर्वेय
ज्ञाः पूर्णा भवंति च॥ तथा श्राद्धं तर्पणं च स्नानं वा सम्यमस्त्विह॥४८॥ मम देहे सुरेशाना ये यजंति मृतादिकं॥ अचिरेणापि
ते सिद्धाः सिद्धिभाजो भवंति वै॥४९॥ पितॄणां कुलसाहस्रं आत्मना सहितं नराः॥ श्राद्धादिना समुद्धृत्य विष्णुलोकं नयेद्ध्रुवं॥
५०॥ यावंत्यश्च सरिच्छ्रेष्ठा गंगाद्याश्च ह्रदाः शुभाः॥ समुद्राद्याः सरोमुख्या मानसाद्या सुरेश्वराः॥५१॥ एकोविष्णुस्त्रिधामू

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग०मा० निर्यावत्तं कीर्त्यते बुधैः॥ तावच्छिलायां सर्वाणि तीर्थानि सह दैवतैः॥५२॥ सदा तिष्ठंतु मुनयो गंधर्वाणां गणाश्च ये॥ याव
७ द्भवति ब्रह्मांडं तावत्तिष्ठंतु वै शिला॥५३॥ मम देहे स्वरूपे च ये यजंति घृतादिकं॥ जुहृत्यग्नौ तु तेषां वै अक्षयं चोपतिष्ठतु॥५४
॥ अक्षय्यं तु भवेच्छ्राद्धं जपहोमतपांसि च॥ शिला पर्वतरूपेण मयि तिष्ठंतु भो सुराः॥५५॥ देवरूपा वचः श्रुत्वा देवाः प्रो
चुः पतिव्रतां॥ त्वया यत्प्रार्थितं सर्वं तद्भविष्यत्यसंशयं॥५६॥ गयासुरस्य शिरसि भविष्यति यदा स्थिरा॥ तदा पादादिरू
पेण स्थास्यामस्त्वयि सुस्थिराः॥५७॥ वरं शिलायै दत्वैवं तदा चांतर्दधुः सुराः॥ इति श्रीवायुपु० श्वे० गयामाहात्म्ये धर्म
शिलामहिमानं नाम तृतीयोध्यायः॥३॥ ॐ॥ सनत्कुमार उवाच॥ वक्ष्ये शिलाया माहात्म्यं शृणु नारद मुक्तिदं॥ यस्यां
गायंति देवाश्च माहात्म्यं मुनिपुंगव॥१॥ शिलास्थिता पृथिव्यां सा देवरूपातिपाविनी॥ विचित्रा रम्या शिला तीर्थं त्रिषु लोके
षु विश्रुतं॥२॥ तस्याः संस्पर्शनाल्लोकाः सर्वे हरिपुरं ययुः॥ शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत्॥ यमो गमत्तु ब्रह्म
लोकं नत्वा ब्रह्माणमब्रवीत्॥३॥ अधिकारं गृहाणाद्य यमदंडं पितामह॥ यममूचे ततो ब्रह्मा स्वगृहे धारयस्व तां॥४॥ ब्र
ह्मोक्तो धर्मराजस्तु गृहे तां समधारयत्॥ यमोधिकारं स्वं चक्रे पापिनां शासनादिकं॥५॥ एवं विधा गुरुतरा शिला जगति वि
श्रुता॥ यथा विष्णुर्यथा ब्रह्मा यथा देवो महेश्वरः॥ ब्रह्मांडे च यथा मेरुस्तथेयं देवरूपिणी॥ गयासुरस्य शिरसि गुरुत्वाद्धारि
तापतः॥६॥ अतः पवित्रयोर्योगः पितॄणां मोक्षदायकः॥ पवित्रयोगयोर्योगे हयमेधमजो करोत्॥७॥ भागार्थमागतान्दृ रामः
ष्ट्वा विस्वाद्यानब्रवीच्छिला॥ शिलास्थितौ प्रतिज्ञां तु कुर्वंतु पितृमुक्तये॥८॥ तथेत्युक्त्वा शिलायां ते देवा विस्वादयः स्थिताः ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥शिलारूपेण मूर्ताख्य पद्रूपेण देवताः॥९॥ मूर्तामूर्तस्वरूपेण स्थिताः सर्वे प्रतिज्ञया॥ दैत्यस्य मुंडपृष्ठे तु यस्मा
त्सा संस्थिता शिला॥१०॥ तस्मात्स मुंडपृष्ठाद्रिः पितॄणां ब्रह्मलोकदः॥ आच्छादितः शिलपादः प्रभासेनाद्रिणा ततः॥
११॥ भासितो भास्करेणासौ प्रभासः परिकीर्तितः॥ प्रभासं हि विनिर्भिद्य शिलांगुष्ठो विनिर्गतः॥१२॥ अंगुष्ठास्थितईशोपि
प्रभासेशः प्रकीर्तितः॥ शिलांगुष्ठैकदेशेयः साच प्रेतशिला स्मृता॥१३॥ पिंडदानाच्च तस्यां तु प्रेतत्वान्मुच्यते नरैः॥ रामोदे
व्या सह स्नातो रामतीर्थं ततः स्मृतं॥१४॥ प्रार्थितोथ महानद्या रामस्नातो भवेद्यदि॥ रामतीर्थं ततो भूत्वा त्रिषु लोकेषु विश्रुतं
॥१५॥ जन्मांतर शतं साग्रं यन्मया दुष्कृतं कृतं॥ तत्सर्वं विलयं यातु रामतीर्थाभिषेचनात्॥ मंत्रेणानेन यः स्नात्वा श्राद्धं कुर्वी
त मानवः॥ रामतीर्थे पिंडदस्तु विष्णुलोकं प्रयात्यसौ॥१७॥ तयेत्फन्कास्थितो रामः सीतया भरताश्रमे॥ राम राम महाबा
हो देवानामभयंकर॥१८॥ त्वां नमस्येह देवेश मम नश्यतु पातकं॥ मंत्रेणानेन यः स्नात्वा श्राद्धं कृत्वा सपिंडकं॥१९॥ प्रे
तत्वात्तस्य पितरो विमुक्ताः पितृतां ययुः॥ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥२०॥ पापं नाशय मे देव मनोवाक्काय
कर्मजं॥ नमस्कृत्य प्रभासेशं भासमानं शिवं व्रजेत्॥२१॥ तं च शंभुं नमस्कृत्य कुर्याद्यमबलिं ततः॥ रामे वनं गते शैलमाग
त्य भरतस्थितः॥२२॥ पितृपिंडादिकं कृत्वा रामेशं स्थाप्य तत्र च॥ रामं सीतां लक्ष्मणं च मुनीन्स्थापितवान् प्रभुः॥२३
॥ भरतस्याश्रमं पुण्यं नित्यं पुण्यं प्रभुसेवितं॥ मतंगस्य पदं तत्र दृश्यते सर्वमानवैः॥२४॥ स्थापितं धर्मसर्वस्वं लोकस्या
स्य निदर्शनात्॥ मतंगस्य पदे श्राद्धी सर्वान्तारयते पितॄन्॥२५॥ रामतीर्थे नरः स्नात्वा रामं सीतां समर्च्य च॥ रामेश्व

ग॰मा॰ रं प्रणम्याथ आनंदो जायते नरः॥ २६॥ शिलायां जघनं भूयः समाक्रांतं नगेन तु॥ धर्मराजेन संप्रोक्तो नगच्छेति नगः स्थि
८ तः॥ २७॥ यमराजधर्मराजौ निश्चलार्थं व्यवस्थितौ॥ ताभ्यां बलिं प्रदास्यामि पितॄणां मुक्तिहेतवे॥ २८॥ द्वौ श्वानौ श्या
मशबलौ वैवस्वतकुलोद्भवौ॥ ताभ्यां बलिं प्रदास्यामि स्यातामेतावहिंसकौ॥ २९॥ शिलाया दक्षिणे हस्ते स्थापितः कुंडप
र्वतः॥ निमिषादित्य ईशानभाग एते महेश्वराः॥ ३०॥ वह्निर्द्वौ वरुणो रुद्राः चत्वारः पितमो स द्राः॥ भरताश्रममासाद्य
तेन तान्नत्यजेन्नरः॥ ३१॥ पापेभ्यः श्वोपपापेभ्यो मुच्यते पितृभिस्सह॥ यत्र कुत्रापि देवर्षे भरतस्याश्रमे यतः॥ ३२
॥ स्नातः श्राद्धादिकं कृत्वा न तत्क्ष्यापि न हीयते॥ गयायां चास्य यं श्राद्धं जपहोमतपांसि च॥ ३३॥ सर्वमानंत्यमाहूय दत्तं च
भरताश्रमे॥ चतुर्युगस्वरूपेण चतस्रश्चापि मूर्तयः॥ ३४॥ दृष्टाः स्पृष्टाः पूजितास्तु पितॄणां मुक्तिदायकाः॥ मुक्तिर्वामन
रूपे वत्तारकाख्यो विधिः परः॥ ३५॥ त्रिविक्रमं चब्रह्माणं यं पश्येत्पुरुषोत्तमं॥ पितृभिः सह धर्मात्मा स याति परमां गतिं
॥ ३६॥ शिलाया वामहस्ते पि स्थापितो द्यंतको गिरिः॥ स्थापितः पिंडदस्तत्र पितॄन्ब्रह्मपुरं नयेत्॥ ३७॥ नैमिषारण्यपा
र्श्वे तु ईजे ब्रह्मा सुरैः सह॥ मुख्यसंज्ञं हितत्तीर्थं देवास्तत्र पदैः स्थिताः॥ ३८॥ तेषु तेषु पदेष्वेव तीर्थेषु मुनिसत्तम॥ य
त्किंचिदशुभं कर्म तत्क्षणाद्यातिवारद॥ ३९॥ तन्नैमिषवरं पुण्यं सेवितं पुण्यपूरुषैः॥ तत्र व्यासः शुकः पैलः कण्वो वेधा
शिवो हरिः॥ ४०॥ तेषां दर्शनमात्रेण मुच्यते पातकैर्नरः॥ वामहस्ते शिलायास्तु यथा उद्यंतको गिरिः॥ ४१॥ स पर्वतः ग॰म॰
समानीतो अगस्त्येन महात्मना॥ तत्र ब्रह्माहरश्चैव तपश्चोग्रं च चक्रतुः॥ ४२॥ तत्रागस्त्यस्य हि वरं कुंडं त्रैलोक्यदुर्लभं॥ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यत्रमूर्त्यष्टकंसिद्धंतप स्तप्त्वाशिवंगतं॥४३॥कुंडेमूर्त्यष्टकंनत्वापित्रृन्ब्रह्मपुरन्नयेत्॥अगस्त्येनाथदेवर्षेउदया
द्रेर्महात्मनः॥४४॥शिलायांवामहस्तेपिस्थापितोगिरिराट्शुभः॥वादित्राद्यैर्दिव्यगीतैराद्योवादित्रकोगिरिः॥४५॥त
त्रविद्याधरोनामगंधर्वाप्सरसांगणैः॥सेवतेह्यापिगीतानिदिव्यानिसहगायति॥४६॥मोहनश्चमुनीथश्चशैलूषोमो
हनोत्तमः॥पर्वतोनारदोध्यानीसंगीतिःपुष्पदंतकः॥४७॥हाहाहूहूप्रभृतयोगीतनादंप्रचक्रिरे॥तत्रचित्ररथोनाम
सर्वगंधर्वसंवृतः॥४८॥गायन्सुमधुराण्येवगीतान्यद्रौमहोत्सवः॥अतःसपर्वतोदेवैःसेव्यतेह्यापिनित्यशः॥४९॥ध
र्मोजस्तत्रदेवेशोहरोभस्मांगरागवान्॥पार्वत्यासहितोरुद्रःपर्वतेगीतनादिते॥५०॥मोदतेपाजितोध्यातःपितॄणांपर
मांगतिं॥गयायांपरमात्माहिदृश्यतेह्यापिमुक्तिदः॥५१॥ह्रियतेवैस्त्वीमायास्तयारुद्रार्चनेमुने॥शिलायादक्षिणेह
स्तेभस्मकूटोगिरिर्धृतः॥५२॥धर्मराजेनतत्रास्तेअगस्त्यःसहभार्यया॥अगस्त्यस्यपदेस्नातःपिंडदोब्रह्मलोकगः॥५३
॥पितृभिःसहधर्मात्मापूज्यमानोदिवौकसां॥भगवांस्तत्रसंयम्यतपश्चोग्रंचचारह॥५४॥ब्रह्मणश्चवरंलेभेमाहात्म्यंभु
विदुर्लभं॥लोपामुद्रातथाभार्यापित्रृन्ब्रह्मपुरन्नयेत्॥५५॥कुंडनाग्रस्तपस्तेपेस्थिताद्रैदक्षिणेगिरौ॥वटोवटेश्वरस्तत्र
स्थितश्चप्रपितामहः॥५६॥तदग्रेरुक्मिणीकुंडंपश्चिमेकपिलानदी॥कपिलेशोनदीतीरेअमासोमसमागमे॥५७॥
कपिलायांनरःस्नात्वाकपिलेशंसमर्च्यच॥कृतेश्राद्धेपिंडदानेपितरोमोक्षमाप्नुयुः॥५८॥तत्राग्निधारागिरिवराद्दा
गतोह्यंतकान्तरं॥तत्रसारस्वतंकुंडंसरस्वत्योपकल्पितं॥५९॥शुक्रस्तत्रसुतैस्सार्धंशंडामर्कादिभिःप्रभुः॥तत्रतत्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ मुनींद्राणां पदेषु मुनिसत्तम॥६०॥ श्राद्धपिंडादिकृत्स्नातः पितॄणां तारयेन्नरः॥ शिलाया वामहस्ते पि गृध्रकूटो गि
१ रिर्द्धृतः॥६१॥ गृध्ररूपेण संसिद्धः तपस्तप्त्वा महर्षयः॥ अतो गिरिर्गृध्रवटस्तत्र गृध्रेश्वरस्थितः॥६२॥ दृष्ट्वा गृध्रेश्व
रं नत्वा याति शंभोः पदं नरः॥ तत्र गृध्रवटस्याधः पिंडदः शिवलोकभाक्॥६३॥ तत्र गृध्रवटं नत्वा प्राप्तकामो दिवं व्रजे
त्॥ ऋणमोक्षं पापमोक्षं शिवं दृष्ट्वा शिवं व्रजेत्॥६४॥ मूलक्षेत्रं च तत्रास्ते पिंडदः स्वर्नयेत्पितॄन्॥ आदिपालेन गिरिणा
समाक्रांतं शिलोदरं॥६५॥ तत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः॥ तं दृष्ट्वा मुच्यते विघ्नैः पितॄन्ब्रह्मपुरं नयेत्॥६६॥
गयानाभौ सुषुम्नायां पिंडदः स्वर्नयेत्पितॄन्॥ शिलाया वामपादे तु स्थापितः प्रेतपर्वतः॥६७॥ धर्मराजेन पापाढ्यो गि
रिः प्रेतशिलाश्रयः॥ पादेन दूरे निक्षिप्त शिलायाः पापभावतः॥६८॥ गतः शिलायाः संसर्गात्प्रेतकूटः पवित्रतां॥ प्रेतकू
टं च तत्रास्ते देवास्तत्र पदैः स्थिताः॥६९॥ तत्र पिंडादिकं कृत्वा प्रेतत्वान्मुच्यते नरः॥ पृथक्स्थिताश्च बहवो विप्रकारिण
एव ते॥७०॥ श्राद्धादिकारिणां नॄणां तीर्थे पितृविमुक्तये॥ प्रेता धानुष्करूपेण करग्रहणकारकाः॥७१॥ पादांकितां मुं
डपृष्ठां महादेवीनिवासिनीं॥ तां दृष्ट्वा सर्वलोकाश्च मुक्ताः पापोपपातकैः॥७२॥ गयाशिरसि पुण्ये च सर्वपापविवर्जिते॥
प्रेतादिवर्जिते यस्मात्ततोतिपावनं वरं॥७३॥ कीकटे च गया पुण्या पुण्यं राजगृहं वनं॥ च्यवनस्याश्रमं पुण्यं नदी पुण्या
पुनःपुना॥७४॥ वैकुंठो लोहदंडश्च गृध्रकूटोथ शौनकः॥ अत्र श्राद्धादिना सर्वान्पितॄन्ब्रह्मपुरन्नयेत्॥७५॥ क्रौंच रामः
रूपेण हि मुनिर्मुंडपृष्ठे तपोकरोत्॥ तस्य पादांकितो यस्मात्क्रौंचपादस्ततः स्मृतः॥७६॥ स्नातो जलाशये तत्र नयेत्स्व १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गस्वकंकुलं॥ बलिः काकशिलायां च काकमोक्षणमोक्षदः॥ ७७॥ मुंडपृष्ठस्य सन्तो हि लोमशो लोमहर्षणः॥ द्वावेतौ पर
मंतप्तौ तपः सिद्धिं परां गतौ॥ ७८॥ आहूयता सरिच्छ्रेष्ठा लोमशेन महानदीः॥ सरस्वती वेत्रवती चंद्रभागा सरस्वती॥ ७९
॥ कावेरी सिंधुवीरा च चंदना च सरिद्वरा॥ वाशिष्ठी शरयुर्गंगा यमुना गंडकी तथा॥ ८०॥ महानदी वैतरणी निःसीरा च दि
वौकसां॥ शरव्यलकनंदा च उदीचीकनकाह्वया॥ कौशिकी ब्रह्मदा ज्येष्ठा सर्वाघौघविमोचिका॥ कृष्णा वेणी चर्मण्वती
नद्यो मुक्तिप्रदायिके॥ ८२॥ आहूय सरितः श्रेष्ठा लोमशो लोमहर्षणः॥ तपसस्तु प्रभावेण नर्मदां मुनिपुंगवः॥ ८३॥ ता
सु सर्वासु यः स्नात्वा पिंडदः स्वर्नयेत्पितॄन्॥ ब्रह्मयोनिं प्रविश्याथ निर्गच्छेद्यस्तु मानवः॥ ८४॥ परं ब्रह्म स याती हवि
मुक्तो योनिसंकटात्॥ निःसीरायां पुष्करिण्यां स्नातः श्राद्धादिकृन्नरः॥ ८५ कुमारी क्रौंचपदे दिव्ये नियमाद्ब्रह्मसरत्रयं॥ स
र्वान्पितॄन्नयेत्स्वर्गं पंचपापिन एव च॥ ८६॥ जनार्दनो भस्मकूटे तस्य हस्ते तु पिंडदः॥ आत्मनोप्यथवान्येषां सव्येनापि
तिलैर्विना॥ ८७॥ जीवतां दधिसंमिश्रं सर्वे ते विष्णुलोकगाः॥ यस्तु पिंडो मया दत्तो तव हस्ते जनार्दन॥ ८८॥ ममुद्दिश्य
त्वया देव देहि पिंडं मृते मम भो॥ एष पिंडो मया दत्तस्तव हस्ते जनार्दन॥ ८९॥ अंतकाले गते मह्यं त्वं मे दाता भविष्यसि
॥ जनार्दन नमस्तुभ्यं नमस्ते पितृमोक्षद॥ ९०॥ पितृमातर्नमस्तेस्तु नमस्ते पितृरूपिणे॥ गयायां पितृरूपेण स्वयमे
व जनार्दनः॥ ९१॥ तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात्॥ नमस्ते पुंडरीकाक्ष ऋणत्रयविमोचन॥ ९२॥ लक्ष्मी
कांत नमस्तेस्तु पितॄणां मोक्षदो भव॥ वामजानुं च संपात्य नत्वा भीमं जनार्दनं॥ ९३॥ श्राद्धं सपिंडकं कृत्वा पितृभिर्वि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ स्तुलोकभाक्॥ पितृभिः सह धर्मात्मा कुलानां च शतेन च॥ १४॥ शिलायां व्यक्तरूपेण व्यक्ताव्यक्तात्मना स्थितः॥
१० लक्ष्मीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला॥ २५॥ इति श्री वायुपुराणे श्वे॰ क॰ ग॰ मा॰ धर्मशिलावर्णनं नाम चतु
र्थोऽध्यायः॥ ४॥ नारद उवाच॥ कथं व्यक्तस्वरूपेण स्थितश्चादिगदाधरः॥ कथमव्यक्तरूपेण व्यक्ताव्यक्तात्मना स्थि
तः॥ १॥ कथं गदा समुत्पन्ना यया प्यादिगदाधरः॥ गदालोलं कथं चासीत्सर्वपापक्षयंकरं॥ २॥ सनत्कुमार उवाच
॥ गदो नामासुरो ह्यासीद्वज्राद्वज्रतरो दृढः॥ प्रार्थितो ब्रह्मणा प्रादात्स्वशरीरास्थि दुस्त्यजं॥ ३॥ ब्रह्मोक्तो विश्वकर्मापि
गदां चक्रेद्भुतां वरां॥ तदस्थिवज्रनिष्पेकां गदां स्वर्गे ह्यधारयत्॥ ४॥ हेतिरक्षो ब्रह्मपुत्रस्तपस्तेपे सुदारुणं॥ दिव्य
वर्षसहस्राणां शतं वायुमभक्षत॥ ५॥ उन्मुखश्चोर्ध्वबाहुश्च पादांगुष्ठवरेण ह॥ एकेन तिष्ठते व्यग्रः शीर्णपर्णोनिला
श्रयः॥ ६॥ ब्रह्मादींस्तपसा तुष्टान्वरं वव्रे वरप्रदान्॥ देवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्मनुजैरपि॥ ७॥ कृशेशानस्य च
क्राद्यैरवध्यः स्यां महाबलः॥ तथेत्युक्त्वांतर्हितास्ते हेतिर्देवानथाजयत्॥ ८॥ इंद्रत्वमकरोद्धेतिर्भीता ब्रह्महरादयः
॥ हरिं ते शरणं जग्मुरूचुर्हेतिं जहीति तान्॥ ९॥ ऊचे हरिरवध्योयं हेतिर्देवासुरैः सुराः॥ महास्त्रं मे प्रयच्छध्वं हेतिं ह
न्म्यां हि तेन ते॥ १०॥ इत्युक्तास्ते ततो देवाः गदां तां हरये ददुः॥ दधार तां गदां भाद्यो देवैरुक्तो गदाधरः॥ ११॥ गदया हेति
माहत्य देवेभ्यस्त्रिदिवं ददौ॥ क्षालनार्थं गदा यत्र लोलिता विष्णुनाभवत्॥ बभूव तद्गदालोलं तीर्थं परमपावनं॥ गदया रामः
दाववृष्ट्वा गयासुरशिरःशिलां॥ १३॥ निश्चलार्थं स्थितो यस्मात्तस्मादादिगदाधरः॥ शिलायां मुंडपृष्ठाद्रिः प्रभासो नग १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पर्वतः॥ उद्यंतो गीतवादित्रो भस्मकूटो गिरिर्महान्॥ गृध्रकूटो प्रेतकूट आदिपालोरविंदकः॥१४॥ क्रौंचपादोस्य्यव
टः फल्गुतीर्थं मधुस्रवा॥ घृतकुल्या मधुकुल्या देविका च महानदी॥१५॥ वैतरिण्यादिना व्यक्तरूपेणादिगदाधरः॥ वि
ष्णोः पदं रुद्रपदं ब्रह्मणः पदमुत्तमं॥१६॥ कश्यपस्य पदं दिव्यं द्वौ हस्तौ यत्र निर्गतौ॥ पंचाग्नीनां पदान्यत्र इंद्रागस्त्य
पदे वरे॥१७॥ रवेश्च कार्तिकेयस्य क्रौंचमातंगयोरपि॥ दधीचं चान्द्रगाणेशे काण्वं च पदमुत्तमं॥१८॥ मुख्यलिंगानि स
र्वाणि व्यक्ताव्यक्तात्मकान्यपि॥१८॥ आद्यो गदाधरश्चैक व्यक्त श्रीमान् गदाधरः॥ गायत्री चैव सावित्री त्रिसंध्येयं सरस्व
ती॥१९॥ गयादित्यश्चोत्तरार्को दक्षिणार्कोपि नैमिषः॥ श्वेतार्को गणनाथश्च वसवोष्टौ मुनीश्वराः॥२०॥ रुद्राश्चैकादश चा
यतथा सप्तर्षयोपरे॥ सोमनाथश्च सिद्धेशः कपर्दीशो विनायकः॥२१॥ नारायणो महालक्ष्मीर्ब्रह्मा श्रीपुरुषोत्तमः॥ मार्कं
डेयो यथकोटीशोप्यं गिरेशः पितामहः॥२२॥ जनार्दनो मंगला च पुंडरीकाक्ष उत्तमः॥ इत्यादिव्यक्तरूपेण स्थितश्चादिगदा
धरः॥२३॥ ब्रह्मणा सह रुद्राद्यैः कारितेनिश्चले सुरे॥ तुष्टावाद्यं गदापाणिं वेधा हर्षणसंवृतः॥२४॥ ब्रह्मोवाच॥ गदाधरं व्य
पगतकालकल्मषं गयागतं गदितगुणं गुणातिगं॥ गुहागतं गिरिवरगौरगेहगं गणार्चितं गदिनमहं नमामि॥२५॥ गदां वि
भर्तीत्यसौ गदाधरः विशेषेण अपगतो कालकल्मषो यस्मात् गयायां विद्यमानं गदिताः गुणाः यस्य असौ तं गदितगुणं गुणा
तिगं सत्वरजस्तमोगुणैः अतिक्रांता स्थितिर्यस्य गुहागतं हृद्गुहागतं॥ गिरिवरगौरगेहगं गिरिवरः कोलाहलस्तस्य गौरे
गुहे गृहे वर्तमानं गणार्चितं देवगणैरर्चितं गदास्यास्तीति गदी तं॥२५॥ अहः श्रियं त्रिदशगणादिसुश्रियं भवश्रियं दिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भवदारुणश्रियं॥ कलिश्रियं कलिमलमर्द्दनश्रियं गदाधरं नौमि तमाश्रितश्रियं॥ २६॥ अर्हःश्रियं अर्हः श्रीर्यस्य त्रि
दशगुणादिसुश्रियं त्रिदशगुणादौ देवगुणादौ सुष्ठु श्रीर्यस्य भवश्रियं भवे संसारे श्रीर्यस्य॥ दितिभवदारुणश्रियं। दि
तिभवाः दैत्याः तेषु दारुणा संहाररूपा श्रीर्यस्य कलिश्रियं। कलौ श्रीर्यस्य। कलियुगे यस्य स्मरणमात्रेण पापराशिर्नष्टो
भवतीत्यर्थः कलिमलमर्द्दनश्रियं यस्य चरित्रश्रवणं कलौ मलानि पापानि तेषां प्रायश्चित्तरूपा श्री र्यस्य आश्रितानां
श्रीर्यस्य प्रसादात् भवति एतादृशं॥ २६॥ दृढाद्दृढं परिदृढगाढसंस्कृतं कामाहृतं सुदृढमरूढिरूढिगं॥ तमाढ्यगं
दृढदुरिताढ्यढौकितं स्वढौकितं दृढतरगोत्रसूक्तिभिः॥ २७॥ दृढात् दृढं वज्रादपि दृढं परिदृढगाढसंस्कृतं परितो दृढाः
ब्रह्मादयः तैरत्यंतं संस्कृतं कामाहृतं कामेन मदनेन आहृतं अप्राप्तं सुदृढं अजरामरं अरूढिरूढिगं अप्रकटतं।
थासर्वपदार्थेषु संतं आढ्यगं आढ्येषु विभूत्यावर्त्तमानं दृढदुरिताढ्यढौकितं वर्तमानपापिभिरप्राप्तं दृढतरगोत्र।
सूक्तिभिः चिरंजीविनो ये मार्कंडेयादयः गोत्रमूलभूता ये शिष्टादयः सूरयो ज्ञानिनः तेषां सूक्तिभिः सुसंस्कृतं वाग्भिः सं
स्कृतं॥ २७॥ विदेहकं करणकलाविवर्जितं विजन्मकं दिनकरवेदिभूषितं॥ गदाधरं ध्वनिमुखवर्जितं परं नमाम्यहं सत
तमनादिमीश्वरं॥ २८॥ विदेहकं पांचभौतिकदेहरहितं करणकलाविवर्जितं कार्यकलाविवर्जितं विजन्मकं जनना
दिरहितं दिनकरवेदिभूषितं दिनकरः सूर्यः तस्य वेदिमंडलं तत्र भूषितं ध्वनिमुखवर्जितं वाक्यात्मत्यस्य परं उत्कृष्टं
॥ २८॥ मनोतिगं मतिवर्जितं परं सदहृदयं श्रुतिशिरसिस्कृतं बुधैः॥ चिदात्मकं कलिगतकारणातिगं गदाधरं हृदयगतं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नमामितं॥२९॥ मनोतिगं अमनोगोचरं मतिगतिवर्जितं बुधैरप्राप्तं सदद्वयं सद्रूपमेकं बुधैः श्रुतिशिरसिस्थितं ज्ञानि
भिः वेदांतवाक्येस्थितं चिदात्मकं चित्स्वरूपं कलिगतकारणातिगं कलिगतकारणानिकामक्रोधादीनि येषां तेषां अ
प्राप्तं॥२९॥ सनत्कुमार उवाच॥ देवैः सार्द्धं ब्रह्मणैवं स्तुतश्चादिगदाधरः॥ ऊचे वरान्वृणीध्वं वै वरं ब्रह्मातमब्रवी
त्॥ ३०॥ शिलायां देवरूपिण्यां न तिष्ठामस्त्वया विना॥ संस्थास्यामो त्वया सार्द्धं नित्यमव्यक्तादिरूपिणा॥ ३१॥ एव
मस्तु श्रिया सार्द्धं स्थितश्चादिगदाधरः॥ लोकानां रक्षणार्थाय जगतां मुक्तिहेतवे॥ ३२॥ सुव्यक्तः पुंडरीकाक्षो ज
नार्द्दन इति श्रुतेः॥ देवैरगम्या या मूर्तिरादिभूता सनातनी॥ ३३॥ सुव्यक्तो श्वेतकल्पे तु भविष्यामि तथा पुनः॥ वाराहक
ल्पे ह्यव्यक्तो देवो मध्यगमत्सुरा॥ ३४॥ संतारणाय लोकानां देवानां रक्षणाय च॥ गयाशिरसि सुव्यक्तो भविष्यति न संशयः
॥ ३५॥ ये द्रक्ष्यंति सदा भक्त्या देवमादिगदाधरं॥ कुष्ठादिव्याधिनिर्मुक्ता यास्यंति हरिमंजसा॥ ३६॥ ये द्रक्ष्यंति सदा भक्त्या
देवमादिगदाधरं॥ ते प्राप्स्यंति धनं धान्यं आयुरारोग्यमेव च॥ ३७॥ कलत्रपुत्रपौत्रादिगुणकीर्त्तिसुखानि च॥ श्रद्ध
या येन मस्यंति राज्यं ब्रह्मपुरं तथा॥ ३८॥ भुक्त्वा व्रजेयुः सततं पुण्यं पुण्यफलं नरः॥ गंधदानेन गंधाढ्यः सौभाग्यं
पुष्पदानतः॥ ३९॥ धूपदानेन राज्याप्तिर्दीपाद्दीप्तिर्भविष्यति॥ ध्वजदानात्पापहानिर्यात्राकृत् ब्रह्मलोकभाक्॥ ४०
॥ श्राद्धादिपिंडदानेन विष्णुं नयति वै पितॄन्॥ श्राद्धदानेन ये देवं मंत्रेणादिगदाधरं॥ ४१॥ स्तोष्यंति ये समभ्यर्च्य पितॄ
न्नेष्यंति माधवं॥ शिवोपि परया प्रीत्या तुष्टावादिगदाधरं॥ ४२॥ शिव उवाच॥ अव्यक्तरूपो यो देवो मुंडपृष्ठादिरूप

ग॰मा॰ तः॥ फल्गुतीर्थादिरूपेण नमाम्यादिगदाधरं॥४३॥ व्यक्तरूपी हि यो देवो जनार्दनस्वरूपतः॥ मुंडपृष्ठे स्वयं ह्यास्ते
१२ नं॰॥४४॥ शिलायां देवरूपिण्यां स्थितो ब्रह्मादिभिः सुरैः॥ पूजितं संस्तुतं देवं नं॰॥४५॥ महदादेश्च जगतो व्यक्तस्यै
कं हि कारणं॥ अव्यक्तं ज्ञानरूपं तं नं॰॥४६॥ यं च दृष्ट्वा तथा स्पृष्ट्वा पूजयित्वा प्रणम्य तं॥ श्राद्धादौ ब्रह्मलोकाप्तिर्नं॰॥
४७॥ देहेंद्रियमनोबुद्धिप्राणाहंकारवर्जितं॥ जाग्रत्स्वप्नविनिर्मुक्तं नं॰॥४८॥ व्यक्ताव्यक्तस्वरूपेण पररूपेण सं
स्थितं॥ मुखादिलिंगरूपेण नं॰॥४९॥ नित्यानित्यविनिर्मुक्तं सत्यमानंदमव्ययं॥ तुरीयं ज्योतिरात्मानं नं॰॥५०॥ स
नत्कुमार उवाच॥ एवं स्तुतो महेशेन प्रीतात्मा ह्यादिगदाधरः॥ स्थितो देवशिलायां च देवैर्ब्रह्मादिभिः सुरैः॥५१॥ सं
स्थितं मुंडपृष्ठाद्रौ देवमादिगदाधरं॥ स्तुवंति पूजयंतीह विष्णुलोकं व्रजंति ते॥५२॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी
चार्थमाप्नुयात्॥ कामानवाप्नुयात्कामी मोक्षार्थी मोक्षमाप्नुयात्॥५३॥ वंध्या च लभते पुत्रमभ्यर्च्यादिगदाधरं॥
राजा विजयमाप्नोति शूद्रः सुखमवाप्नुयात्॥५४॥ पुत्रार्थी लभते पुत्रान्वेदवेदांगपारगान्॥ मनसा प्रार्थितं सर्वं पू
जाद्यैः प्राप्नुयाद्धरेः॥५५॥ इति श्रीवायुपुराणे श्वेतवराहकल्पे गयामाहात्म्ये पंचमोऽध्यायः॥५॥ सनत्कुमार उवाच॥
गयायात्रां प्रवक्ष्यामि शृणु नारद मुक्तिदां॥ निष्कृतिस्त्विह कर्तॄणां ब्रह्मणा गीयते पुरा॥१॥ उद्यतश्चेद्गयां गंतुं श्राद्धं
कृत्वा विधानतः॥ विधाय कार्पटी वेषं कृत्वा ग्रामप्रदक्षिणं॥२॥ ततो ग्रामांतरं गत्वा श्राद्धशेषान्नभोजनं॥ ततः प्रति रामः
दिनं गच्छेत्प्रतिग्रहविवर्जितः॥३॥ प्रतिग्रहाद्युपावृत्तः संतुष्टो नियतः शुचिः॥ अहंकारनिवृत्तो यः स तीर्थफलमश्नु १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ते॥४॥ यस्य हस्तौ च पादौ च मनश्चापि सुसंयतं॥ जितेन्द्रियो दानशीलः स तीर्थफलमश्नुते॥ १॥ गृहाच्चलितमात्रे-
ण गयायां गमनं प्रति॥ स्वर्गारोहणसोपानं पितॄणां च पदे पदे॥ २॥ पदे पदेऽश्वमेधस्य यत्फलं गच्छतो गयां॥ तत्फलं
लभते पुण्यं समग्रं नात्र संशयः॥ ३॥ ततो गयां समासाद्य ब्रह्मचारी समाहितः॥ अश्वमेधमवाप्नोति गमनादेव नारद॥
४॥ ततो गयाप्रवेशे तु पूर्वतोऽस्ति महानदी॥ तत्र तोयं समुत्पाद्य स्नातव्यं निर्मले जले॥ ५॥ देवादींस्तर्पयित्वा तु श्राद्धं कृत्वा
यथाविधि॥ स्ववेदशाखागदितमर्घ्यावाहनवर्जितं॥ ६॥ अपरेऽह्नि शुचिर्भूत्वा गच्छेच्च प्रेतपर्वतं॥ ब्रह्मकुंडे ततः स्नात्वा
देवादींस्तर्पयेत्सुधीः॥ ७॥ कुर्याच्छ्राद्धं सपिंडानां प्रयतः प्रेतपर्वते॥ प्राचीनावीतिना भाव्यं दक्षिणाभिमुखः स्मरन्॥ ८॥
कव्यवालोऽनलः सोमो यमश्चैवार्यमा तथा॥ अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः॥ ९॥ आगच्छंतु महाभागा युष्माभी
रक्षितास्त्विह॥ मदीयाः पितरो ये च कुले जाताः सनाभयः॥ १०॥ तेषां पिंडप्रदानार्थमागतोऽस्मि गयामिमां॥ ते सर्वे तृप्तिमा
यांतु श्राद्धेनानेन शाश्वतीं॥ ११॥ आचम्योक्त्वा तु पंचांगं प्राणायामं तु यत्नतः॥ पुनरावृत्तिरहितब्रह्मलोकाप्तिहेतवे॥ १२
॥ एवं च विधिवच्छ्राद्धं कृत्वा पूर्वं यथाक्रमं॥ पितॄनावाह्य चाभ्यर्च्य मंत्रैः पिंडप्रदो भवेत्॥ १३॥ तीर्थे प्रेतशिलादौ च च
रुणा सघृतेन च॥ प्रक्षाल्य पर्वतस्थानं पंचगव्यैः पृथक्पृथक्॥ १४॥ स्वमंत्रैरर्घ्यसंपूज्य पदे च पददैवतं॥ यावति
लामनुष्येश्च गृहीताः पितृकर्मसु॥ १५॥ गच्छंति भीतास्त्वसुराः सिंहं दृष्ट्वा यथा मृगाः॥ अष्टकासु च वृद्धौ च गयायां च मृ
तेऽहनि॥ १६॥ मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह॥ वृद्धिश्राद्धं तु मात्रादि गयायां पितृपूर्वकं॥ १७॥ पादपूर्वं समार

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ्यदक्षिणाग्रैः कुशैः क्रमात्॥ पित्रादीनां समास्तीर्य तेषां गृह्योक्तमाचरेत्॥ १८॥ सक्तुना मुष्टिमात्रेण दद्याद्दस्य्यपिंड
कं॥ तिलाज्यमधुदध्यादीन्पिंडद्रव्येषु योजयेत्॥ १९॥ संबंधिनस्तिलाद्भिश्च कुशेष्वावाहयेत्ततः॥ आब्रह्मस्तंबपर्यंतं
देवर्षिपितृमानवाः॥ २०॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनां॥ २१॥ आ
ब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकं॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ २२॥ माता पितामही चैव तथैव प्रपि
तामही॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ २३॥ तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतु॥ मुष्टिमात्रप्रमाणं च आ
र्द्रामलकमात्रकं॥ २४॥ शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे॥ उद्धरेत्सप्तगोत्राणां कुलमेकोत्तरं शतं २५॥ पितुर्मातुश्च
भार्याया दुहितुर्भगिन्यास्तथा॥ पितृष्वसुर्मातृभगिन्याः सप्तगोत्राः प्रकीर्तिताः॥ २६॥ चतुर्विंशश्च विंशश्च षोडशद्वादशै
व हि॥ रुद्रादशवसुश्चैव कुलान्येकोत्तरं शतं॥ २७॥ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते॥ आवाहयिष्ये तान्सर्वान्
कुशपृष्ठैस्तिलोदकैः॥ २८॥ मातामहकुले ये च गतिर्येषां न विद्यते॥ आवा॰॥ २९॥ बंधुवर्गकुले ये च गतिर्येषां न विद्यते
॥ आवा॰॥ ३०॥ इत्येतैः सजलैर्मंत्रैर्दर्भेषु ध्यानवान्पितॄन्॥ आवाह्याभ्यर्च्य तेभ्यश्च पिंडान्दद्यात्यथाक्रमं॥ ३१॥ अ
स्मत्कुले मृता ये च गतिर्येषां न विद्यते॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं॥ ३२॥ मातामहकुले ये च गतिर्येषां न वि
द्यते॥ तेषामुद्धरणार्थाय इ॰॥ ३३॥ बंधुवर्गकुले ये च गतिर्येषां न विद्यते॥ तेषां॰॥ ३४॥ अजातदंता ये केचिद्ये च गर्भे प्रपी
डिताः॥ तेषामु॰॥ ३५॥ अग्निदग्धाश्च ये केचित् नाग्निदग्धास्तथापरे॥ विद्युच्चौरहता ये च तेभ्य॰॥ ३६॥ दावदाहे मृता ये च

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सिंहव्याघ्रहताश्च ये॥ दंष्ट्रिभिः शृंगिभिर्वापि तेभ्य०॥ ३७॥ उद्बंधनमृता ये च विषशस्त्रहताश्च ये॥ आत्मनो घातिनो ये च
तेभ्यः०॥ ३८॥ अरण्ये वर्त्मनि रणे क्षुधया तृषया हताः॥ भूतप्रेतपिशाचाश्च तेभ्यः०॥ ३९॥ रौरवे चांधतामिस्रे कालसू
त्रे च ये गताः॥ तेषां०॥ ४०॥ असिपत्रवने घोरे कुंभीपाके च ये गताः॥ तेषां०॥ ४१॥ अनेकयातनासंस्थाः प्रेतलोकं च ये
गताः॥ तेषामु०॥ ४२॥ असंख्ययातनासंस्था ये नीता यमशासनैः॥ तेषामु०॥ ४३॥ नरकेषु समस्तेषु यातनायां च संस्थि
ताः॥ तेषामु०॥ ४४॥ पशुयोनिगता ये च पक्षिकीटसरीसृपाः॥ अथवा वृक्षयोनिस्थास्तेभ्यः०॥ ४५॥ जात्यंतरसहस्रेषु
भ्रमंतः स्वेन कर्मणा॥ मानुष्यं दुर्लभं येषां तेभ्यः॥ ४६॥ दिव्यंतरिक्षभूमिष्ठाः पितरो बांधवादयः॥ मृता असंस्कृता ये च ते
भ्यः०॥ ४७॥ ये केचित्प्रेतरूपेण वर्तंते पितरो मम॥ ते सर्वे तृप्तिमायांतु पिंडेनानेन शाश्वतीं॥ ४८॥ ये बांधवा बांधवा वा ये
ऽन्यजन्मनि बांधवाः॥ तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतु॥ ४९॥ पितृवंशे मृता ये च मातृवंशे तथैव च॥ गुरुश्वशुर
बंधूनां ये चान्ये बांधवादयः॥ ५०॥ ये मे कुले लुप्तपिंडाः पुत्रदारैर्विवर्जिताः॥ क्रियालोपगता ये च जात्यंधाः पंगवस्तथा॥
५१॥ विरूपा आमगर्भाश्च ज्ञाताऽज्ञाताः कुले मम॥ धर्मपिंडो मया दत्तो ह्यक्षय्यमु०॥ ५२॥ आब्रह्मणो ये पितृवंशजाता मातु
स्तथा वंशभवा मदीयाः॥ वंशद्वये ऽस्मिन्मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च॥ ५३॥ मित्राणि सख्यः पशवश्च वृक्षा
दृष्टाश्चादृष्टाश्च कृतोपकाराः॥ जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि॥ ५४॥ एतांश्च सर्वमंत्रांस्त्रीलिं
गांतान् समुह्य च॥ पिंडं दद्याद्यथा पूर्वं स्त्रीणां मात्रादिकात्क्रमात्॥ ५५॥ स्वगोत्रे परगोत्रे च दंपत्योः पिंडदानतः॥ अथ

ग॰मा॰ यकं निष्फलं श्राद्धं पिंडे मूद्रकतर्पणं॥ ५६॥ पिंडपात्रे तिलान्कृत्वा पूरयित्वा शुभोदकैः॥ परिषिंच्य त्रिधा सर्वान्प्र
१४ णिपत्य समापयेत्॥ ५७॥ समापनमंत्रः॥ ये च वोत्र ये चास्माना शंसंते यांश्च वोत्र याश्चानाशंसंते ते च वहंतां ताश्च
वहंतां तृप्यंतु भवंतस्तृप्यंतु भवत्यस्तृप्यत तृप्यत तृप्यत॥ पुत्रान्पौत्रानभिवर्द्धयंती रापो मधुमतीरिमाः॥ स्वधां पितृ
भ्यो अमृतं दुहाना आपो देवी रुभयांस्तर्पयंतु॥ पितृन्विसृज्य चाचम्य साक्षिणः श्रावयेत्सुरान्॥ साक्षिणः सं
तु मे देवाः ब्रह्मेशानादयस्तथा॥ ५८॥ मया गयां समासाद्य पितॄणां निष्कृतिः कृता॥ आगतोस्मि गयां देवपितृका
र्ये गदाधर॥ ५९॥ त्वमेव साक्षी भगवन् अनृणोहं ऋणत्रयात्॥ सर्वस्यानेषु चैवं स्यात्पिंडदानं तु नारद॥ ६०॥ प्रेत
पर्वतमारुह्य कुर्यात्तीर्थेषु चक्रस्नात्॥ तिलमिश्रांस्ततः सक्तून्क्षिपेत्प्रेतपर्वते॥ ६१॥ अपसव्येन देवर्षे दक्षिणा
भिमुखः क्रमात्॥ ये केचित्प्रेतरूपेण वर्तंते पितरो मम॥ ६२॥ ते सर्वे तृप्तिमायांतु सक्तुभिस्तिलमिश्रितैः॥ आब्रह्मस्तं
बपर्यंतं यत्किंचित्सचराचरं॥ ६३ मया दत्तेन तोयेन तृप्तिमायातु सर्वशः॥ प्रेतत्वाच्च विमुक्ताः स्युः पितरस्तस्य नारद॥
६४॥ प्रेतत्वं तस्य माहात्म्यान्न कुले चापि न विद्यते॥ नाम्ना प्रेतशिलाख्या ता गयाशिरसि मुक्तये॥ ६५॥ तीर्थमंत्रादिरूपे
णास्थितश्चादिगदाधरः॥ ६६॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये षष्ठोध्यायः॥ ६॥ सनत्कुमार उवाच॥
आदौ तु पंचतीर्थेषु चोत्तरे मानसे विधिः॥ आचम्य कुशहस्तेन शिरश्चाभ्युक्ष्य वारिणा॥ १॥ उत्तरे मानसे गच्छेन्मंत्रेण रा॰मः
स्नानमाचरेत्॥ उत्तरे मानसे स्नानं करोम्यात्मविशुद्धये॥ २॥ सूर्यलोकादिसंसिद्धिः सिद्धये पितृमुक्तये॥ स्नात्वा यत १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्पणंकृत्वाश्राद्धंकृत्वासपिंडकं॥३॥मानसंहिसरोयस्मात्तस्मादुत्तरमानसं॥सूर्यंनत्वार्चयित्वाथसूर्यलोकंनयेत्पितॄ
न्॥४॥ओंनमोभानवेभर्त्रेसोमभौममत्तरूपिणे॥जीवभार्गवशनैश्चरराहुकेतुस्वरूपिणे॥५॥उत्तरात्मानसान्मौनि
व्रजेद्दक्षिणमानसं॥दक्षिणेमानसेचैवतीर्थत्रयमुदाहृतं॥६॥स्नात्वातेषुविधानेनकुर्यात्श्राद्धंपृथक्पृथक्॥उदीच
तीर्थमित्युक्तंतन्नोदीच्यांविमुक्तिदं॥७॥अत्रस्नातोदिवंयातिस्वशरीरेणमानवः॥मध्येकनखलंतीर्थंत्रिषुलोकेषुविश्रु
तं॥८॥स्नात्वाकनकवद्भातिनरोयातिपवित्रतां॥तस्यदक्षिणभागेचतीर्थंदक्षिणमानसं॥९॥दक्षिणेमानसेस्नानंकरो
म्यात्मविशुद्धये॥सूर्यलोकादिसंसिद्धिसिद्धयेपितृमुक्तये॥१०॥ब्रह्महत्यादिपापौघघातनायविमुक्तये॥दिवाकरकरो
मीहस्नानंदक्षिणमानसे॥११॥सूर्यंनत्वाचस्मृत्वाचसूर्यलोकंनयेत्पितॄन्॥नमामिसूर्यंतृप्त्यर्थंपितॄणांतारणायवै॥१२
॥पुत्रपौत्रधनैश्वर्यआयुरारोग्यवृद्धये॥अनेनस्नानपूजादिकुर्याच्छ्राद्धमनुत्तमं॥कृत्वानत्वाचमौनार्कमिमंमंत्रमुदीरयेत्
॥फल्गुतीर्थंव्रजेत्तस्मात्सर्वतीर्थोत्तमोत्तमं॥१३॥मुक्तिर्भवतिपितॄणांकर्तॄणांतारणायच॥ब्रह्मणाप्रार्थितोविष्णुःफ
ल्गुरूपोभवत्पुरा॥१४॥दक्षिणाग्निहुतंनूनंतद्द्रवंफल्गुतीर्थकं॥तीर्थानियानिसर्वाणिभुवनेष्वखिलेष्वपि॥१५॥तानि
स्नातुंसमायान्तिफल्गुतीर्थेसुरैःसह॥गंगापादोदकंविष्णोःफल्गुर्ह्यादिगदाधरः॥१६॥स्वयंहिद्रवरूपेणतस्माद्गंगाधि
कंविदुः॥अश्वमेधसहस्राणांसहस्रंयःसमाचरेत्॥१७॥नासौतत्फलमाप्नोतिफल्गुतीर्थेयदाप्नुयात्॥फल्गुतीर्थेवि
ष्णुजलेकरोमिस्नानमादृतः॥१८॥पितॄणांविष्णुलोकायभुक्तिमुक्तिप्रसिद्धये॥फल्गुतीर्थेनरःस्नात्वातर्पणंश्राद्धमाच

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग०मा रेत्॥१९॥सपिंडकंस्वसूत्रोक्तंनमेदद्यपितामहः॥नमःशिवायदेवायईशानपुरुषायच॥२०॥अघोरवामदेवायसद्योजा
१५ तायशंभवे॥फल्गुतीर्थेनरःस्नात्वादृष्ट्वादेवंगदाधरं॥२०॥आत्मानंतारयेत्सद्योदशपूर्वान्दशापरान्॥नत्वागदा
धरंदेवंमंत्रेणानेनपूजयेत्॥२१॥ॐनमोवासुदेवायनमःसंकर्षणायच॥प्रद्युम्नायानिरुद्धायश्रीधरायचविष्णवे॥२२॥
पंचतीर्थ्यांनरःस्नात्वाब्रह्मलोकंनयेत्पितॄन्॥अमृतैःपंचभिःस्नानंपुष्पवस्त्राद्यलंकृतं॥२३॥नकुर्याद्योगदापाणित
स्यश्राद्धमपार्थकं॥नागकूटाद्गृध्रकूटाद्यूपाद्योत्तरमानसात्॥२४॥एतद्गयाशिरःप्रोक्तंफल्गुतीर्थंतदुच्यते॥मुंडपृ
ष्ठान्नगाधस्तात्फल्गुतीर्थमनुत्तमं॥तत्रश्राद्धादिनासर्वेपितरोमोक्षमाप्नुयुः॥मुखंगयासुरस्यैततस्माच्छ्राद्धमथाक्ष
यं॥प्रथमेन्हिविधिःप्रोक्तोद्वितीयेदिवसेव्रजेत्॥२५॥धर्मारण्येतत्रधर्मस्तस्माद्यत्नमकारयत्॥गमतांब्रह्मलोकाशि
भवत्येवहिनारद॥२६॥मतंगवाप्यांयःस्नात्वातर्पणंश्राद्धमाचरेत्॥गत्वानत्वामतंगेशमिमंमंत्रमुदीरयेत्॥२७॥
प्रमाणंदेवताःसंतुलोकपालाश्चसाक्षिणः॥मयागत्यमतंगेस्मिन्पितॄणांनिष्कृतिःकृता॥२८॥तत्कूपयूपयोर्मध्ये
सर्वान्तारयतेपितॄन्॥धर्मंधर्मेश्वरंनत्वामहाबोधितरुंनमेत्॥२९॥नमस्तेश्वत्थराजायब्रह्मविष्णुमहेश्वर॥बो
धिद्रुमायपितॄणांकर्तृणांतारणायच॥३०॥एकादशोसिरुद्राणांवसूनामष्टमोवसुः॥नारायणोसिदेवानांवृक्षराजो
सिपिप्पल॥अश्वत्थरूपिणंदेवंशंखचक्रगदाधरं॥नमामिपुंडरीकाक्षंशंखरूपधरंहरिं॥येऽस्मत्कुलेमातृवंशबां ग०म:
धवादुर्गतिंगताः॥त्वद्दर्शनात्स्पर्शनाच्चस्वर्गतिंयांतितेऽक्षये॥३१॥ऋणत्रयंमयादत्तंगयामागत्यवृक्षराट्॥त्वत्प्रसा १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दान्महापापाद्विमुक्तोहं भवार्णवात्॥ ३२॥ तृतीये ब्रह्मशिरसि स्नात्वा श्राद्धं सपिंडकं॥ कृत्वा सर्वप्रमाणेन मंत्रेण विधि-
वत्सुतः॥ ३३॥ स्नानं करोमि तीर्थेस्मिन् ऋणत्रयविमुक्तये॥ श्राद्धाय पिंडदानाय तर्पणाय विशुद्धये॥ ३४॥ तत्कूपयूपयोर्म-
ध्ये ब्रह्मलोकं नयेत्पितॄन्॥ गयां कृत्वोच्छ्रितो यूपो ब्रह्मणा यूप इत्यपि॥ ३५॥ कृत्वा ब्रह्मसरः श्राद्धं सर्वांस्तारयते पितॄ-
न्॥ यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत्॥ ३६॥ ब्रह्माणं च नमस्कृत्य ब्रह्मलोकं नयेत्पितॄन्॥ ओं नमो ब्रह्मणे जाय
जगज्जन्माधिकारिणे॥ ३७॥ भक्तानां च पितॄणां च तारणाय नमो नमः॥ गोप्रचारसमीपस्था आम्रा ब्रह्मप्रकल्पिताः॥ ३८॥
तेषां सिंचनमात्रेण पितरो मोक्षगामिनः॥ आम्रं ब्रह्मसरोद्भूतं सर्वदेवमयं तरुं॥ ३९॥ विष्णुरूपं प्रसिंचामि पितॄणां मुक्तिहे
तवे॥ ४०॥ एको मुनिः कुंभकुशाग्रहस्त आम्रस्य मूले सलिलं ददानः॥ आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थक
री प्रसिद्धा॥ ४१॥ ततो यमबलिं क्षिप्त्वा मंत्रेणानेन संयुतः॥ यमराज धर्मराजौ निश्चलार्थं व्यवस्थितौ॥ ४२॥ ताभ्यां बलिं प्र
दास्यामि पितॄणां मुक्तिहेतवे॥ ततः श्वानबलिं क्षिप्त्वा मंत्रेणानेन संयुतः॥ ४२॥ श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भ
वौ॥ ताभ्यां बलिं प्रदास्यामि रक्षेतां पथि सर्वदा॥ ४३॥ ततः काकबलिं क्षिप्त्वा पुनः स्नानं समाचरेत्॥ ऐंद्रवारुणवाय
व्यां याम्यां वै नैर्ऋतास्तथा॥ ४४॥ वायसाः प्रतिगृह्णंतु भूम्यां पिंडं मयोज्झितं॥ फल्गुतीर्थे चतुर्थेह्नि स्नानादिकं समाचरे
त्॥ ४५॥ गयाशिरसि यत् श्राद्धं पदकुर्यात्सपिंडकं॥ साक्षाद्गयाशिरस्तत्र फल्गुतीर्थाश्रितं कृतं॥ ४६॥ नगाज्जना
र्दनात् ब्रह्मकूपादुत्तरमानसात्॥ एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते॥ ४७॥ पितामहं समासाद्य यावदुत्तमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नसात्॥ फल्गुतीर्थंतु विज्ञेयं देवानामपि दुर्लभं॥४८॥ क्रौंचपादात्फल्गुतीर्थं यावत्साक्षाद्गयाशिरः॥ मुखं गयासुरस्यै
व तस्माच्छ्राद्धमक्षयं॥४९॥ मुंडपृष्ठान्नगाधस्तात्साक्षात्तत्फल्गुतीर्थकं॥ आद्यो गदाधरो देवो व्यक्ताव्यक्तोव्यव
स्थितः॥५०॥ विष्ण्वादिपदरूपेण पितॄणां मुक्तिहेतवे॥ तत्र विष्णुपदं दिव्यं दर्शनं पापनाशनं॥५१॥ स्पर्शनं पूजनं
चैव पितॄणां दत्तमक्षयं॥ श्राद्धं सपिंडकं कृत्वा कुलसाहस्रमात्मनः॥५२॥ नयेद्धि विष्णुपदं दिव्यमनंतं शिवमक्षयं॥ श्रा
द्धं कृत्वा रुद्रपदे नयेत्कुलशतं नरः॥५३॥ सहात्मानं शिवपुरं तथा ब्रह्मपदे नरः॥ ब्रह्मलोकं कुलशतं समुद्धृत्य नये
त्पितॄन्॥५४॥ दक्षिणाग्निपदे श्राद्धं वाजपेयफलं लभेत्॥ गार्हपत्यपदे श्राद्धी राजसूयफलं लभेत्॥५५॥ श्राद्धं कृत्वाऽ
हवनीयपदेऽश्वमेधफलं लभेत्॥ श्राद्धं कृत्वा सभ्यपदे ज्योतिष्टोमफलं लभेत्॥५६॥ आवसथ्यपदे श्राद्धी सोमलो
कं नयेत्पितॄन्॥ श्राद्धं कृत्वा शक्रपदे इंद्रलोकमवाप्नुयात्॥५७॥ अगस्त्यस्य पदे श्राद्धी पितॄन्ब्रह्मपुरं नयेत्॥ क्रौंचमातंग
योः श्राद्धी ब्रह्मलोकं नयेत्पितॄन्॥५८॥ श्राद्धी सूर्यपदे पंच पापिनोऽर्कपुरं नयेत्॥ कार्तिकेयपदे श्राद्धी शिवलोकं नयेत्
पितॄन्॥५९॥ गणेशस्य पदे श्राद्धी रुद्रलोकं नयेत्पितॄन्॥ गजकर्णिकायां तर्पणकृन्निर्मलं स्वर्नयेत्पितॄन्॥६०॥ अ
न्येषां च पदे श्राद्धी पितॄन्ब्रह्मपुरं नयेत्॥ सर्वेषां काश्यपं श्रेष्ठं विष्णो रुद्रस्य वा पदं॥६१॥ ब्रह्मणोऽपि पदं श्रेष्ठं सर्वेषां त
त्र कीर्तितं॥ प्रारंभे परिसमाप्तौ च तेषामन्यतमं स्मृतं॥६२॥ श्रेयस्करं भवेत्तत्र श्राद्धकर्तुश्च नारद॥ कश्यपस्य पदे—
दिव्ये भारद्वाजो मुनिः पुरा॥६३॥ श्राद्धं कृत्वोद्यतो दातुं पित्रादिभ्यश्च पिंडकं॥ कृष्णशुक्लौ ततो हस्तौ पदमुद्भिद्य निर्गतौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥६४॥ दृष्ट्वा हस्तद्वयं तत्र मुनिः संशयमागतः॥ ततः स्वमातरं शांतां भारद्वाजश्च पृष्टवान्॥६५॥ कश्यपस्य पदे दि
व्ये कस्मै शुक्लेथवा करे॥ पिंडो देयो मया मातर्जानासि पितरं वद॥६६॥ शांता उवाच॥ भारद्वाज महाप्राज्ञ देहि कस्मा
य पिंडकं॥ भारद्वाजस्ततः पिंडं दातुं कस्माय चोद्यतः॥६७॥ श्वेतो हस्योब्रवीत्तत्र पुत्रस्त्वं हि ममौरसः॥ कस्मोब्रवीन्म
म क्षेत्रं ततो मे देहि पिंडकं॥६८॥ शुक्लोब्रवीत्स्वैरिणीयं पुत्रस्त्वं हि ममौरसः॥ स्वैरिण्यथाब्रवीद्दाकं क्षेत्रिणे वीर्यिणे त
तः॥ भारद्वाजस्ततः पिंडं कश्यपस्य पदे ददौ॥६९॥ हंसयुक्तविमानेन ब्रह्मलोकमुभौ गतौ॥ रामो रुद्रपदे श्राद्धी पिंड
दानाय चोद्यतः॥७०॥ पिता दशरथः स्वर्गे प्रसार्य करमागतः॥ नादात्पिंडं करे रामो ददौ रुद्रपदे ततः॥७१॥ शास्त्रार्थो
तिक्रमाद्भीतो रामं दशरथोब्रवीत्॥ तारितोहं त्वया पुत्र रुद्रलोकमवाप्नुयां॥७२॥ हस्ते पिंडप्रदानेन स्वर्गतिर्न हि मे भवे
त्॥ त्वं च राज्यं चिरं कृत्वा पालयित्वा द्विजान्प्रजाः॥७३॥ यज्ञान्सदक्षिणान्कृत्वा विष्णुलोकं व्रजिष्यसि॥ पुर्य्यो यो ध्याज
नैः सार्द्धं पक्षिकीटादिभिः सह॥७४॥ इत्युक्त्वासौ दशरथः रुद्रलोकं परं ययौ॥ भीष्मो विष्णुपदे दिव्ये आजुहाव स्वका
न्पितॄन्॥७५॥ श्राद्धं कृत्वोद्यतो दातुं पित्रादिभ्यश्च पिंडकं॥ पितुर्विनिर्गतौ हस्तौ गयाशिरसि शंतनोः॥७६॥ नादात्पिंडं
करे भीष्मो ददौ विष्णुपदे ततः॥ शांतनुः प्राह संतुष्टः शास्त्रार्थे निश्चलो भव॥७७॥ त्रिकालदृष्टिर्भवतु अंते विष्णुश्च ते गतिः
॥ स्वेच्छया मरणं चास्तु इत्युक्त्वा मुक्तिमागतः॥७८॥ कनकेशं च केदारं नरसिंहं च वामनं॥ रथमार्गे समभ्यर्च्य पितॄन्सर्वांश्च
तारयेत्॥७९॥ गयाशिरसि यः पिंडान्येषां नाम्ना तु निर्वपेत्॥ नरकस्था दिवं यांति स्वर्गस्था मोक्षमाप्नुयुः॥८०॥ गयाशिर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ सियः पिंडं शमीपत्रप्रमाणतः॥ कंदमूलफलाद्यैर्वा दद्यात्स्वर्गं नयेत्पितॄन्॥ पदानि यत्र दृश्यंते विष्ण्वादीनां तदग्रतः॥
१७ श्राद्धं कृत्वा तेषु पिंडान् तेषां लोकं नयेत्पितॄन् ॥८२॥ सर्वत्र मुंडपृष्ठाद्रिः पादैरेभिः सुलक्षितः॥ प्रयांति पितरः सर्वे ब्रह्मलो
कं सनामयं॥८३॥ पंचमेऽह्नि गदालोले स्नानं कृत्वा सपिंडकं॥ श्राद्धं पितॄन्ब्रह्मलोकं नयेदात्मानमेव च॥८४॥ गदालोलमि
ति ख्यातं सर्वेषामुत्तमोत्तमं॥ हेत्यासुरस्य यच्छीर्षं गदया चह्विधाकृतं॥८५॥ यतः प्रक्षालिता तीर्थे गदा लोलं ततः स्मृतं॥
गदालोले महातीर्थे गदाप्रक्षालने वरे॥८६॥ स्नानं करोमि शुध्यर्थमक्षय्याय स्वराप्तये॥ ब्रह्मप्रकल्पितान् विप्रान् भोज
येत्तोषयेत्ततः॥८७॥ तैस्तुष्टैस्तोषिताः सर्वाः पितृभिः सह देवताः॥ कृते श्राद्धे क्षय्यवटे अन्नेनैव प्रयत्नतः॥ दृष्ट्वा नत्वा
च संपूज्य वटेशं च समाहितः॥८८॥ पितॄन्नयेत्ब्रह्मलोकमक्षय्यं च सनातनं॥ वटवृक्षसमीपे च शाकेनाप्युदकेन वा
॥८९॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता॥ गयायां धर्मपृष्ठे च शिरसि ब्रह्मणस्तथा॥ गयाशीर्षे वटे चैव पितॄणां द
त्तमक्षयं॥ देयं दानं शोडशाकं गयातीर्थपुरोधसे॥९०॥ वस्त्रगंधादिभिः सम्यक्संपूज्य च प्रयत्नतः॥ एकार्णवे वटस्याग्रे
यः शेते योगनिद्रया॥९१॥ बालरूपधरस्तस्मै नमस्ते योगशायिने॥ संसारवृक्षशस्त्राय शेषपापहराय च॥९२॥ अक्षय्यब्र
ह्मदात्रे च नमोऽक्षय्यवटाय वै॥ कलौ माहेश्वरा लोका येन तस्माद्गदाधरः॥९३॥ लिंगरूपो भवत्तं च वंदे श्रीप्रपितामहं॥९४॥
इति श्री वायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये सप्तमोऽध्यायः॥७॥ सनत्कुमार उवाच॥ यज्ञं चक्रे गयो राजा बह्वन्नं ब रामः
हुदक्षिणं॥ यत्र द्रव्यसमूहानां संख्या कर्तुं न शक्यते॥ स्थिता गयायामन्यानां पर्वताः पंचविंशतिः॥१॥ सिकता वा यथा लो १७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केयया च दिविता रकाः॥ तथा बहुसुवर्णाद्यैरसंख्याताः सुदक्षिणाः॥ २॥ नैवेह केचिदिह न करिष्यंति तथापरे॥ प्रविशंति
द्विजास्तत्र प्रादेशे देशेषु पूजिताः॥ ३॥ गयं विस्वादयस्तुष्टा वरं ब्रूहीति चाब्रुवन्॥ गयस्तान्प्रार्थयामास विप्राः शप्ताश्च ये
पुरा॥ ४॥ ब्रह्मणा ते द्विजा पूता भवंतु क्रतुपूजिताः॥ गयाश्राद्धविधानाय द्विजा मूर्ताश्चतुर्दश॥ ५॥ तेषां वाक्यं प्रकुर्वीत यदि
ब्रह्मा स्वयं भवेत्॥ गौतमं काश्यपं कौत्सं कौशिकं कण्वमेव च॥ ६॥ भारद्वाजं ह्यौशनसं वात्स्यं पाराशरं तथा॥ सनत्कुमारं मांड
व्यं लैगाक्षिं लोमशं महत्॥ ७॥ वाशिष्टं च तथात्रेयं गोत्राण्येषां चतुर्दश॥ गयापुरीति मन्त्रान्माख्याता ब्रह्मपुरं तथा॥ ८॥
एवमस्तु वरं दत्त्वा तथान्तर्दधुः सुराः॥ गयश्च भोगान्संभुज्य विष्णुलोकं परं ययौ॥ ९॥ विशालायां विशालो भूद्राजपुत्रो
ब्रवीद्द्विजान्॥ कथं पुत्रादयो मे स्युर्विशालं चाब्रुवन्द्विजाः॥ १०॥ गयायां पिंडदानेन तव सर्वं भविष्यति॥ विशालोपि गयाशी
र्षपिंडदः पुत्रवानभूत्॥ ११॥ दृष्ट्वाकाशे सितं रक्तं कृष्णं पुरुषमब्रवीत्॥ के यूयं तेषु चैवैकः सितः प्रोचे विशालकं॥ १२॥
अहं सितस्ते जनक इंद्रलोकादिहागतः॥ मम पुत्र पिता रक्तो ब्रह्महा पापकृत्तमः॥ १३॥ अयं पितामहः कृष्णः ऋषयो ये
न घातिताः॥ अवीचिं नरकं प्राप्तौ मुक्तौ त्वत्पिंडदानतः॥ १४॥ मुक्तिः कृता त्वया पुत्र व्रजामः स्वर्गमव्ययं॥ तातं पितामहं चै
व तथैव प्रपितामहम्॥ १५॥ प्रीणयामीति यत्तोयं त्वया दत्तमरिंदम॥ तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम॥ १६॥ एवं पु
त्रैः पितॄणां च कर्तव्या मुक्तिरुत्तमा॥ त्वं च राज्यं चिरं कृत्वा भुक्त्वा भोगान्सुदुर्लभान्॥ १७॥ यज्ञान्सदक्षिणान्कृत्वा अंते विष्णुपु
रं व्रज॥ तत्र भोगैः सुतृप्तस्त्वमंते मोक्षमवाप्स्यसि॥ एवं लब्ध्वरो राजा राज्यं भुक्त्वा दिवं गतः॥ १८॥ प्रेतराजः सह प्रेतैर्गया

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग॰मा॰ १८ श्राद्धादिवं गतः॥ प्रेतः कश्चिन्स्वमुक्त्यर्थं वणिजं कंचिदब्रवीत्॥१९॥ मम नाम्ना गयाशीर्षे पिंडनिर्वपणं कुरु॥ प्रे
तभावाद्विमुक्तये त्वं गृहस्व धनं मम॥२०॥ तद्धनं सर्वमादाय गयायज्ञे व्ययं कुरु॥ षोडशं पंचभागाश्च तुभ्यं वै द
त्तवानहं॥२१॥ स्वनामानि यथान्यायं सम्यगाख्यातवान्नरः॥ गत्वा वणिक् गयाशीर्षे प्रेतराजाय पिंडकं॥२२॥ प्र
ददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ॥ प्रेताः प्रेतत्वनिर्मुक्ताः वणिक् स्वगृहमागतः॥२३॥ एवं गयस्य शंभोश्च से
त्रे विष्णोः स्वयंभुवः॥ उपोषितो यथा यत्रो तीर्थे महानदीस्थिते॥२४॥ गायत्र्याः पुरतः स्नात्वा प्रातःसंध्यामुपासये
त्॥ श्राद्धं सपिंडकं येषां नयेत् ब्रह्मण्यतां कुलं॥२५॥ तीर्थे समुद्यते स्नात्वा सावित्र्याः पुरतो नरः॥ संध्यामुपास्य मध्या
न्हे नयेत्कुलशतं दिवं॥२७॥ पिंडदानं ततः कुर्यात्पितॄणां मुक्तिकाम्यया॥ प्राची सरस्वती तीर्थे स्नात्वा चापि यथाविधि
॥२८॥ संध्यामुपास्य सायान्हे विष्णुलोकं नयेत् पितॄन्॥ बहुजन्मकृतात् संध्यालोपान्मुक्तस्स्विसंध्यकृत्॥२९॥ विशा
लायां लेलिहानतीर्थे च भरताश्रमे॥ पादांकिते मुंडपृष्ठे गदाधरसमीपतः॥३०॥ तीर्थे चाकाशगंगायां गिरिकर्णमुखे
षु च॥ स्नातो पिंडप्रदो ब्रह्मलोकं कुलशतं नयेत्॥३१॥ देवनद्यां वैतरिण्यां स्नातः स्वर्गं नयेत्पितॄन्॥ स्नातो गोदावरीतो
रैत्रिः सप्तकुलमुद्धरेत्॥३२॥ सत्यं सत्यं पुनः सत्यं वैतरण्यां तु नारद॥ एकविंशतिकुलान्याशु तारयन्नात्र संशयः॥३३॥
यमद्वारे महाघोरे या सा वैतरणी नदी॥ तामहं तर्तुमिच्छामि कृष्णां गां प्रददामिमां॥३४॥ अशक्तो यदि वा शक्तो गां प्रदद्या रामः
द्द्विजातये॥ या सा वैतरणी नाम नदी त्रैलोक्यविश्रुता॥ सावतीर्णा महाभागा पितॄणां तारणाय च॥ ३४ त्रिरात्रोषणेनैव १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तीर्थाभिगमनेन च ॥ अदत्त्वा कांचनं गाश्च दरिद्रो जायते नरः ॥ ३५ ॥ घृतकुल्या मधुकुल्या देविका च महानदी ॥ शिला
यां संगमो यत्र तीर्थं यत्र मधुस्रवा ॥ ३६ ॥ अयुतं चाश्वमेधानां स्नानकृल्लभ्यते नरः ॥ श्राद्धं सपिंडकं कृत्वा पिंडदानं तथै
व च ॥ ३७ ॥ कुलानां शतमुत्धृत्य विष्णुलोकं नयेत्पितॄन् ॥ दशाश्वमेधिके हंसे तीर्थे चामरकंटके ॥ ३८ ॥ कोटितीर्थे रु
क्मिणी कुंडे पिंडदः स्वर्नयेत्पितॄन् ॥ वैतरिण्यां घृतकुल्यां मधुकुल्यां तथैव च ॥ ३९ ॥ कोटितीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्व
रं च यत् ॥ कोटिजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ ४० ॥ मार्कंडेयेशकोटीशौ नत्वा स्यात्सितृतारकः ॥ रुक्म पारिजा
तकवने पार्वत्या सह शंकरः ॥ ४१ ॥ रहस्ये संस्थितो रम्ये वर्षाणामयुतं पुरा ॥ मरीचिः फलपुष्पार्थं पारिजातकवनं गतः ॥
४२ ॥ दृष्ट्वा शप्तो महेशेन यस्मात्सुखविघातकः ॥ दुःखी भवेति तच्छ्रुत्वा मरीचिस्तुष्टुवे शिवं ॥ ४३ ॥ तुष्टः प्रोवाच तं शंभुर्वृणीष्व
र मुत्तमं ॥ शापाद्भवतु मुक्तिर्मे मरीचिः प्राह शंकरं ॥ ४४ ॥ भवेद्भार्या यां मुक्तिस्ते शिवोक्तः प्रययौ गयां ॥ शिलास्थितस्तपस्तेपे स तेपे सं
दुष्करं च यत् ॥ ४५ ॥ मरीचिरीश्वराच्छप्तः कृष्णत्वमगमत्पुरा ॥ तपसा दारुणेनेह सोपि शुक्लत्वमागतः ॥ ४६ ॥ हरिरूचे मरीचिं च
वरं वृणुहि पुत्रक ॥ किं त्वन्यत्त्वयि तुष्टे मे मरीचिः प्राह माधवं ॥ ४७ ॥ हरशापाद्विमुक्तोहं शिला भवतु पावनी ॥ पितृमुक्तिकरी सा स्या
त्तथेत्युक्त्वा दिवं ययौ ॥ ४८ ॥ दिवौकसां पुष्करिणीं समासाद्य नरः शुचिः ॥ यत्र दत्तं पितृभ्यश्च भवेत्तस्याक्षयमित्युत ॥ ४९ ॥ तत्र स्ना
तो दिवं याति स्वशरीरेण मानवः ॥ पाषाणं प्रजहत्येष जीर्णां त्वचमिवोरगः ॥ ५० ॥ तत्र कंजवरं पुण्यं पुण्यकृद्भिर्निषेवितं ॥ पांडु
शिला वै सा प्रोक्ता श्राद्धं तत्रास्य यं भवेत् ॥ ५१ ॥ युधिष्ठिरः कृतस्तां हि श्राद्धं कर्तुं ययौ मुने ॥ तत्र काले पांडुनी कं मद्धस्ते देहि पिंडकं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यांचपिंडदानंचकारसः॥शिलायांपिंडदानेनप्रहृष्टोव्यासनंदनः॥५३॥वरंपुत्रायप्रददौराज्यंकुरुमहीतले॥अ
कंटकंतुसंपूर्णंत्वमेवासिहिपुत्रक॥५४॥स्वर्गंव्रजशरीरेणभ्रातृभिःपार्श्वगैःसह॥दृष्टिमात्रेणसंपूतान्नरकस्था
न्दिवंनय॥५५॥इत्युक्त्वाप्रययौपांडुःशाश्वतंपदमव्ययं॥मतंगस्यपदेश्राद्धीब्रह्मलोकंनयेत्पितॄन्॥५६॥निमं
थ्याग्निंशमीगर्भोविधिर्विष्ण्वादिभिःसह॥लेभेतीर्थंतुयज्ञार्थंत्रिषुलोकेषुविश्रुतं॥५७॥मखसंज्ञंचतत्तीर्थंपितॄ
णांमुक्तिदायकं॥पितॄन्स्वर्गालयंनत्वासंगमेगारकेश्वरौ॥गयाकूपेपिंडदानादश्वमेधफलंलभेत्॥५८॥भस्मकूटेभ
स्मनाथःस्नात्वातारयतेपितॄन्॥त्यक्त्वापापंभवेन्मुक्तःसंगमेस्नानमाचरेत्॥५९॥धौतपादोयनिःक्षीरासंगमे
स्नानकृन्नरः॥श्राद्धीरामपुष्करिण्यांब्रह्मलोकंनयेत्पितॄन्॥६०॥सुषुम्नांचमहाकुल्यांत्रिःसप्तकुलमुद्धरेत्॥स्ना
तोनत्वावशिष्ठेशंतत्तीर्थेचाश्वमेधभाक्॥इष्टिंचक्रेश्वमेधाख्यांवशिष्ठोमुनिसत्तमः॥६१॥दृष्टितोनिर्गतःशंभुःवरंद
त्तुवसिष्ठक॥आहेतितंवसिष्ठोपिशिवतुष्टोसिमेयदि॥६२॥वास्तव्यंचात्रदेशेचतथेत्युक्त्वाशिवःस्थितः॥पिंडदोधे
नुकारण्येकामधेनुपदेषुच॥६३॥स्नात्वाश्राद्धमथसंपूज्यब्रह्मलोकंनयेत्पितॄन्॥कर्दमालयेगयानाभौमुंडपृष्ठस
मीपतः॥६४॥स्नात्वाश्राद्धादिकंकृत्वापितॄणामनृणोभवेत्॥फल्गुचंडीश्मशानाक्षीमंगलाद्याःसमर्चयेत्॥६५॥ग
यायांचवृषोत्सर्गात्त्रिःसप्तकुलमुद्धरेत्॥यत्रतत्रास्थितादेवाऋषयोपिजितेंद्रियाः॥६६॥गयोगजोगयादित्योगायत्री
चगदाधरः॥गयागयशिरश्चैवषड्गयामुक्तिदायकाः॥६७॥आदौगदाधरंध्यात्वाश्राद्धंपिंडादिकंनरः॥कुलानांशतमुद्ध

त्यब्रह्मलोकं नयेत्पितृन्॥ ६८॥ गयाख्यानमिदं पुण्यं यः पठेत्सततं नरः॥ शृणुयाच्छ्राद्धकाले यस्तु सयाति परमां गतिं
॥ ६९॥ श्रीमत्गयायामाहात्म्यं शृणुयाद्यस्तु भक्तितः॥ विधिनाव्यासपुरुषं वित्तशाठ्यं न कारयेत्॥ ७०॥ गोभूहिरण्य
दानानि वस्त्रालंकरणानि च॥ संपूज्यव्यासपुरुषं भुक्तिमुक्तिप्रदायकं॥ ७१॥ पाठयेद्वा गयाख्यानं विप्रेभ्यः पुण्यकृन्नरः॥
शृणुश्राद्धकृतं तेन कृतं तेन सुनिश्चितं॥ ७२॥ गयायां महिमानं च ज्योतिष्टोमसमाहितः॥ तेनेष्टं राजसूयेन अश्वमेधे
न नारद॥ ७३॥ लिखेद्वा लेखयेद्वापि पूजयेद्वापि पुस्तकं॥ तस्य गृहे स्थिरा लक्ष्मीः सुप्रसन्ना भविष्यति॥ ७४॥ उपाख्यान
मिदं पुण्यं गृहे तिष्ठति पुस्तकं॥ सर्पाग्निचोरजनितं भयं तत्र न विद्यते॥ ७५॥ श्राद्धकाले पठेद्यस्तु गयामाहात्म्यमुत्तमं॥
विधिहीनं तु संपूर्णं पितॄणां तु गयासमं॥ ७६॥ यानि तीर्थानि त्रैलोक्ये तानि तिष्ठंति तत्र वै॥ येन ज्ञातं गयाख्यानं श्रुतं वा प
ठितं मुने॥ ७७॥ सोपि तत्फलमाप्नोति समग्रं नात्र संशयः॥ सूत उवाच॥ सनत्कुमारो मुनिपुंगवाय पुण्यां कथां चाथ निवे
द्य भक्त्या॥ स्वमाश्रमं पुण्यवनैरुपेतं विसृज्य संगीतगुरुं जगाम॥ ७८॥ इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामा
हात्म्ये अष्टमो अध्यायः॥ ८॥ ॥ वाराणसीप्रसादस्य नियोगेन प्रयत्नतः॥ काशीसंस्कृतमुद्रायां मंकितो यं शिलाक्षरैः
॥ १॥ श्रीकाशीजीमे महल्ले होदकटोरा श्रीबाबूवाराणसीप्रसादजीके मकानमे काशीसंस्कृतमुद्रायंत्रमे छपी जिनको ले
ना होय उनको उक्तस्थानमे श्रीबाबूवाराणसीप्रसादजीके पास याक चौरीगलीमे भाई प्रतापसिंहजीके दुकान पर मिले

॥ गी॥ संवत् १९४१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिगयामाहात्म्यसमाप्तं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative